मूलं—मुद्रैषा खेचरी यस्तु सुस्थचित्तो ह्यतन्द्रितः ॥ शतब्रह्मगतेनापि क्षणार्धं मन्यते हि सः ॥ ५७ ॥

टीका—जो मनुष्य इस खेचरीमुद्राको स्वस्थ चित्त ब्रह्मपरायणहोके करेगा उसको यदि शत ब्रह्माभी गत भावको प्राप्तहों क्षणार्ध प्रतीत होगा ॥ ५७ ॥

मूलं—गुरूपदेशतोमुद्रां यो वेत्ति खेचरीमिमां॥नानापापरतो धीमान् स याति परमां गतिम् ॥ ५८ ॥

टीका—गुरूपदेशसे जिसको यह खेचरीमुद्रा लाभ होगी वह यदि नानापापरतहोगा तो भी बुद्धिमान साधक परमगतिको प्राप्तहोगा अर्थात् मोक्ष होजायगा ॥ ५८ ॥

मूलं—सा प्राणसदृशी मुद्रा यस्मिन् कस्मिन् न दीयते ॥ प्रच्छाद्यते प्रयत्नेन मुद्रेयं सुरपूजिते ॥ ५९ ॥

टीका—हेसुरपूजिते पार्वती यह खेचरीमुद्रा प्राणके

बराबरहै सामान्य मनुष्यको देना उचित नहीं है इस मुद्राका यत्न करके गोपित रखनेमे कल्याणहै ॥५९॥

अथ जालन्धरबन्ध ॥

मूलं-बध्वागलशिराजालं हृदये चिबुकं न्यसेत् ॥बन्धो जालन्धरः प्रोक्तो देवाना-मपिदुर्लभः ॥६० ॥ नाभिस्थवह्निर्जन्तूनां सहस्रकमलच्युतं ॥ पिबेत्पीयूषविस्तारं तदर्थं बन्धयेदिमम् ॥ ६१ ॥

टीका-गुरूउपदेशद्वारा गलशिराजालको बांधके चिबुक अर्थात् ठोढीको हृदयमें स्थित करे इसको जालन्धर बन्ध कहतेहैं यह देवतोंकोभी दुर्लभहै नाभिस्थित जीव जठरानल सहस्रदल कमलसे जो अमृत स्रवताहै उसको पान करजाताहै इसहेतुसे यह जालन्धरबन्ध करना उचितहै तात्पर्य यहहै कि नाभिस्थित सूर्य अमृतको पान करजातेहैं इसीकारणसे मृत्यु होतीहै इस जालन्धरबन्धके करनेसे चंद्रमण्डलच्युतअमृत सूर्यमण्डलमें नहींजाता योगी आपही पान करकेचिरंजीव रहताहै ॥ ६० ॥ ६१ ॥

मूलं-बन्धेनानेन पीयूषं स्वयं पिबति बुद्धिमान् ॥ अमरत्वञ्च सम्प्राप्य मोदते भुवनत्रये ॥ ६२ ॥

टीका-इस जालन्धरबन्धके प्रभावसे बुद्धिमान् योगी स्वयं अमृत पान करताहै और अमरत्वको पायके तीनोंलोकमें आनन्द पूर्वक विचरताहै ॥ ६२ ॥

मूलं-जालन्धरो बन्ध एष सिद्धानां सिद्धिदायकः॥ अभ्यासः क्रियते नित्यं योगिना सिद्धिमिच्छता ॥ ६३ ॥

टीका-यह जालन्धबरन्ध सिद्धोंको सिद्धिदेनेवाला है इसकारणसे सिद्धिकांक्षी योगीको इसका नित्यअभ्यास करना उचितहै ॥ ॥ ६३ ॥

अथ मूलबन्ध ॥

मूलं-पादमूलेन संपीड्य गुदमार्गेषु यन्त्रितम् ॥६४॥ बलादपानमाकृष्य क्रमादूर्ध्वं सुचारयेत् ॥कल्पितोऽयं मूलबन्धो जरा मरणनाशनः ॥ ६५ ॥

टीका-पादमूल अर्थात् एडीसे गुदामार्गको आकुञ्चन करके पीडितकरे और बलसे अपानवायुके आकर्षण करके ऊर्ध्वको लेजाय अर्थात् प्राणके साथ सम्बन्धकरे इसको मूलबन्ध कहतेहैं यहबन्ध जरा मरणका नाश करनेवालाहै ॥ ६४ ॥ ६५ ॥

मूलं-अपानप्राणयोरैक्यं प्रकरोत्यधि-

कल्पितम्॥बन्धेनानेन सुतरां योनिमुद्रा प्रसिद्धयति ॥ ६६ ॥

टीका-इस कल्पितबन्धसे अपान और प्राणको एक करे और इसी मूलबन्धके प्रभावसे योनिमुद्रा आपही सिद्ध होजायगी ॥ ६६ ॥

मूलं-सिद्धायां योनिमुद्रायां किं न सिध्यति भूतले ॥ बन्धस्यास्य प्रसादेन गगने विजितानिलः ॥ पद्मासने स्थितो योगी भुवमुत्सृज्य वर्तते ॥ ६७ ॥

टीका-योनिमुद्राके सिद्ध होनेसे सिद्ध लोगोंको इस संसारमें सब सिद्ध होसक्ताहै इस मूलबन्धके प्रसादसे वायुको योगी जीतके पद्मासन स्थित होके भूमिको त्याग देगा और आकाशमें गमन करेगा ॥ ६७ ॥

मूलं-सुगुप्ते निर्जने देशे बन्धमेनं समभ्यसेत् ॥ संसारसागरं तर्तुं यदीच्छेद्योगिपुंगवः ॥ ६८ ॥

टीका-पवित्र योगी यदि संसारसागरसे पार होनेकी इच्छा करे तो निर्जनदेश और गुप्तस्थानमें इस मूलबन्धका अभ्यास करना उचित है ॥ ६८ ॥

अथ विपरीतकरणी मुद्रा ॥

मूलं-भूतले स्वशिरो दत्त्वा खे नयेच्चरणद्व-

यम् ॥ विपरीतकृतिश्चैषा सर्वतन्त्रेषु गोपिता ॥ ६९ ॥

टीका साधक अपने शिरको भूमिपर धरे और दोनों चरणको ऊपर आकाशमें निरालम्ब स्थिर करे यह विपरीत करणी मुद्रा सर्वतन्त्रोंकरके गोपितहै अर्थात् प्रकाश करने योग्य नहीं है ॥ ६९ ॥

मूलं–एतद्यः कुरुते नित्यमभ्यासं याममात्रतः ॥ मृत्युं जयति योगीशः प्रलये नापिसीदति ॥ ७० ॥

टीका–इस प्रकारसे इस मुद्राका अभ्यास नित्य एक प्रहर करे तो योगी निश्चय मृत्युको जीत लेगा और प्रलयमेंभी उसको कुछ कष्ट न होगा ॥ ७० ॥

मूलं–कुरुतेऽमृतपानं यः सिद्धानां समतामियात् ॥ स सेव्यः सर्वलोकानां बन्धमेनं करोति यः ॥ ७१ ॥

टीका–जो पुरुष शरीरस्थ अमृतपान करताहै उसको सिद्धोंकी समता प्राप्त होती है और इस मुद्राबन्धको जो करताहै वह सर्व लोकमें पूजनीयहै ॥ ७१ ॥

मूलं–नाभेरूर्ध्वमधश्चापि तानं पश्चिममाचरेत् ॥ उड्डियानबंध एष स्यात्सर्वदुःखौ-

घ नाशनः॥ ७२ ॥ उदरे पश्चिमं तानं नाभेरूर्ध्वं तु कारयेत् ॥ उड्डचानाख्योऽत्र बन्धोयं मृत्युमातङ्गकेसरी ॥ ७३ ॥

टीका—नाभिसे ऊपर और नीचेको आकुञ्चन करे इसको उड्डचानबन्ध कहते हैं यह दुःखके समूहको नाश करनेवालाहै उदरको पछि आकर्षण करे और नाभिसे ऊपर भागमें आकुञ्चनकरे यह उड्डचानबन्धहै और मृत्युरूपो मातङ्गका नाश करनेवाला यह बंधरूपी सिंहहै ॥ ७२ ॥ ७३ ॥

मूलं—नित्यं यः कुरुते योगी चतुर्वारं दिने दिने ॥तस्य नाभेस्तु शुद्धिः स्याद्येन सिद्धो भवेन्मरुत् ॥ ७४ ॥

टीका—जो योगी नित्य इस बंधको चार बार अभ्यास करेगा उसका नाभिचक्र शुद्ध होके वायु सिद्ध होजायगा ॥ ७४ ॥

मूलं—षण्मासमभ्यसन्योगी मृत्युं जयति निश्चितम् ॥ तस्योदराग्निर्ज्वलति रसवृद्धिः प्रजायते ॥७५॥

टीका—योगी यदि छः मास इस बंधका अभ्यास करे तो निश्चय मृत्युको जीतलेगा और उसका जठरा-

नल विशेष प्रज्वलित होगा और रसकी वृद्धि उत्पन्न होगी ॥ ७५ ॥

मूलं-अनेन सुतरां सिद्धिर्विग्रहस्य प्रजायते ॥ रोगानां संक्षयश्चापि योगिनो भवति ध्रुवम् ॥ ७६ ॥

टीका-इस उड्डयानबंधके प्रभावसे योगीका शरीर आपही सिद्ध हो जायगा अर्थात् अमर होजायगा और सर्व रोगोंका निश्चय क्षय होजायगा ॥ ७६ ॥

मूलं-गुरोर्लब्ध्वा प्रयत्नेन साधयेत्तु विचक्षणः ॥ निर्जने सुस्थिते देशे बन्धं परम दुर्लभम् ॥ ७७ ॥

टीका-गुरुसे यत्न पूर्वक इस परम दुर्लभ बन्धको लाभ करके बुद्धिमान साधक एकांत स्थानमें स्वस्थ चित्त होके साधन करे ॥ ७७ ॥

अथ वज्रोलीमुद्रा ॥

मूलं-वज्रोलीं कथयिष्यामि संसारध्वान्तनाशिनीम् ॥ स्वभक्तेभ्यः समासेन गुह्याद्गुह्यतमामपि ॥७८॥

टीका-हे देवी! संसारतम नाशनी परमगोपनीय वज्रोली मुद्रा भक्तलोगोंके प्रति हम कहतेहैं ॥ ७८ ॥

मूलं-स्वेच्छया वर्तमानोपि योगोक्तनियमैर्विना ॥ मुक्तो भवति गार्हस्थो वज्रोल्यभ्यासयोगतः ॥ ७९ ॥

टीका-गृहस्थ अपने इच्छा पूर्वक गृहमें भोग करेगा और योगमें जो नियम कहाहै उसके विना इस वज्रोली मुद्राके योग अभ्याससे मुक्तहोजायगा ॥ ७९ ॥

मूलं-वज्रोल्यभ्यासयोगोऽयं भोगयुक्तेपि मुक्तिदः ॥ तस्मादतिप्रयत्नेन कर्तव्यो योगिभिः सदा ॥ ८० ॥

टीका-यह वज्रोलीका योगअभ्यास भोग युक्त मनुष्योंके प्रति मुक्तिका दाताहै इसकारणसे अति यत्न करके सर्वदा योगीको अभ्यास करना उचितहै ॥ ८० ॥

मूलं-आदौ रजः स्त्रियो योन्या यत्नेन विधिवत्सुधीः ॥ आकुंच्य लिंगनालेन स्वशरीरेप्रवेशयेत् ॥ ८१ ॥ स्वकं बिंदुञ्च सम्बन्ध्य लिंगचालनमाचरेत् ॥ दैवाच्चलति चेदूर्ध्वं निबद्धो योनिमुद्रया ॥८२॥ वाममार्गेऽपि तद्विन्दुं नीत्वा लिङ्गं निवारयेत्॥ क्षणमात्रं योनितो यः पुमांश्चालन-

माचरेत् ॥ ८३ ॥ गुरूपदेशतो योगी हुंहु-ङ्कारेण योनितः ॥ अपानवायुमाकुंच्य बलादाकृष्य तद्रजः ॥ ८४ ॥

टीका-प्रथम बुद्धिमान साधक यत्न करके विधान पूर्वक स्त्रीके योनिसे रजको लिङ्गनालमें आकर्षण करके अपने शरीरमें प्रवेशकरे और अपने विन्दुको निरोध करके लिङ्ग चालनकरे यदि दैवात् विन्दु अपने स्थानसे चले तो योनिमुद्रासे निरोध करके ऊपरको आकर्षणकरे और उस विन्दुको वाम भागमें स्थित करके क्षणमात्र लिङ्ग चालन निवारणकरे फिर गुरूपदेशद्वारा योगी हुंहुंकार शब्द उच्चारण पूर्वक योनिमें लिङ्ग चालनकरे और बलसे अपानवायुको आकुञ्चन करके स्त्रीके रजको आकर्षणकरे इसको वज्रोली मुद्रा कहतेहैं ॥ ८१ ॥ ८२ ॥ ८३ ॥ ८४ ॥

मूलं-अनेन विधिना योगी क्षिप्रं योगस्य सिद्धये ॥ गव्यभुक् कुरुते योगी गुरुपादाब्जपूजकः ॥ ८५ ॥

टीका-इसविधानसे योगीको शीघ्र योग सिद्ध होगा और गुरुपादपद्मपूजक योगी शरीरस्थ अमृत पान करेगा ॥ ८५ ॥

मूलं–बिन्दुर्विधुमयो ज्ञेयो रजः सूर्यमयस्तथा॥ उभयोर्मेलनं कार्यं स्वशरीरे प्रवेशयेत् ॥८६॥

टीका–बिन्दुरूपी चन्द्र और रजरूपी सूर्य यह जानकर दोनोंका सम्बन्ध करके अपने शरीरमें प्रवेश करना उचितहै ॥ ८६ ॥

मूलं–अहं बिन्दू रजः शक्तिरुभयोर्मेलनं यदा ॥ योगिनां साधनावस्था भवेद्दिव्यं वपुस्तदा ॥ ८७ ॥

टीका–यदि शिवरूपी बिन्दु और रजरूपी शक्ति यह दोनोंका सम्बन्ध होगा तब योगीका साधनसे दिव्य शरीर अर्थात् देवतोंके समान शरीर होगा तात्पर्य यहहै कि शिवशक्ति अर्थात् माया ईश्वरके सम्बन्ध वा मायाको ईश्वरमें लय करनेसे जिसको अध्यारोप अपवाद कहतेहैं योगीमोक्ष होता है अभिप्राय यह है कि रज बिन्दुका सम्बन्ध जिस साधकको सिद्ध होजाताहै वह मुक्त है ॥ ८७ ॥

मूलं–मरणं बिन्दुपातेन जीवनं बिन्दुधारणे ॥ तस्मादतिप्रयत्नेन कुरुते बिन्दुधारणम् ॥ ८८॥

टीका-बिन्दुपात होनेसे मृत्यु होती है और बिन्दुके धारणसे प्राणी जीवताहै इस कारणसे यत्नसे बिन्दुको धारण रखना उचित है ॥ ८८ ॥

मूलं-जायते म्रियते लोके बिन्दुना नात्र संशयः ॥ एतज्ज्ञात्वा सदा योगी बिन्दुधारणमाचरेत् ॥ ८९ ॥

टीका-प्राणीका जन्म मरण बिन्दुसे होताहै इसमें संशय नहीं है इसहेतुसे इसको विचारके योगीको उचितहै कि बिन्दुको सर्वदा धारण रक्खे ॥ ८९ ॥

मूलं-सिद्धे बिन्दौ महायत्ने किं न सिध्यति भूतले ॥ यस्य प्रसादान्महिमा ममाप्येतादृशो भवेत् ॥ ९० ॥

टीका-हेपार्वती यत्नपूर्वक बिन्दुके सिद्ध होनेसे संसारमें क्या नहीं सिद्ध होसक्ता अर्थात् सब सिद्ध हो सक्ताहै इसीके प्रसादसे हमारी ऐसी महिमाहै ॥ ९० ॥

मूलं-बिन्दुः करोति सर्वेषां सुखं दुःखञ्च संस्थितः ॥ संसारिणां विमूढानां जरामरणशालिनाम् ॥ ९१ ॥ अयंच शांकरो योगो योगिनामुत्तमोत्तमः ॥ ९२ ॥

टीका-बिन्दु संसारी मनुष्योंके सुख और दुःखका

कारणहै और मूढ लोगोंके मूढताका और जरामरण शील लोगोंका अर्थात् सबका यही बिन्दु हेतुहै योगी लोगोंके प्रति यह हमारा उत्तम योगहै ॥ ९१ ॥ ९२ ॥

मूलं-अभ्यासात्सिद्धिमाप्नोति भोगयुक्तोऽपि मानवः ॥ सकलः साधितार्थोऽपि सिद्धो भवति भूतले ॥ ९३ ॥

टीका-भोगयुक्त मनुष्योंकोभी अभ्याससे सिद्धी प्राप्त होतीहै और सकल वाञ्छितफल संसारमें सिद्ध होजाताहै ॥ ९३ ॥

मूलं-भुक्त्वा भोगानशेषान् वै योगेनानेन निश्चितम्॥अनेन सकला सिद्धिर्योगिनां भवति ध्रुवम् ॥ सुखभोगेन महता तस्मादेनं समभ्यसेत् ॥ ९४ ॥

टीका-इस योगअभ्यासद्वारा निश्चय अशेषभोग भोगनेसे सुखी होगा और योगीलोगोंको इस वज्रोली मुद्रासे सकल सिद्धी अवश्य प्राप्तहोती हैं और महान सुख भोगते हुए यह साधना सिद्ध होगी इसलिए इसका अभ्यास करना उचितहै ॥ ९४ ॥

मूलं-सहजोल्यमरोली च वज्रोल्या भेदतो भवेत्॥ येनकेन प्रकारेण बिन्दुं योगी प्रधारयेत् ॥ ९५ ॥

टीका-वज्रोलीके भेदसे सहजोली और अमरोली मुद्राकी संज्ञाहै योगीको उचितहै कि सब प्रकारसे बिन्दुको धारण करे ॥ ९५ ॥

मूलं-दैवाच्चलति चेद्वेगे मेलनं चन्द्रसूर्ययोः ॥ अमरोलिरियं प्रोक्ता लिंगनालेन शोषयेत् ॥ ९६ ॥

टीका-यदि हठात वेगवश बिन्दुचले और रजबिन्दु का सम्बन्ध होजाय तो इसको अमरोली कहते हैं परंतु लिङ्गनाल द्वारा रजबिन्दु दोनोंको शोषणकरे ॥ ९६ ॥

मूलं-गतं बिन्दुं स्वकंयोगी बन्धयेद्योनिमुद्रया ॥ सहजोलिरियं प्रोक्ता सर्वतन्त्रेषु गोपिता ॥ ९७ ॥

टीका-निज बिन्दु चलायमान होय तो योगी योनि मुद्राके बन्धसे अवरोध करे इसको सहजोली कहतेहैं यह सर्व तन्त्रों करके गोपनीयहै ॥ ९७ ॥

मूलं-संज्ञाभेदाद्भवेद्भेदः कार्यं तुल्यगतिर्यदि ॥ तस्मात्सर्वप्रयत्नेन साध्यते योगिभिः सदा ॥ ९८ ॥

टीका-यदि कार्य एक समान है परन्तु संज्ञासे अमरोली और सहजोली दो भेद भयाहै इस हेतुसे

योगीको उचितहै कि यह दोनों अमरोली और सहजो-
लीका यत्न पूर्वक सर्वदा साधन करै ॥ ९८ ॥

मूलं–अयं योगो मया प्रोक्तो भक्तानां स्नेह-
तः प्रिये ॥ गोपनीयः प्रयत्नेन न देयो
यस्य कस्यचित् ॥ ९९ ॥

टीका–हे प्रिये पार्वती हम भक्तोंपर प्रेम करके यह
योग जो कहाहै यत्नपूर्वक गोपनीयहै सामान्य मनुष्य
को कदापि देना उचित नहीं है ॥ ९९ ॥

मूलं–एतद्गुह्यतमं गुह्यं न भूतं न भविष्य-
ति ॥ तस्मादेतत्प्रयत्नेन गोपनीयं सदा
बुधैः ॥ १०० ॥

टीका–इस वज्रोलीमुद्रासे अधिक गोपनीय न कुछ
भयाहै न होगा इसकारणसे बुद्धिमान साधकको
यत्नपूर्वक इसको गोप्य रखना उचितहै ॥ १०० ॥

मूलं–स्वमूत्रोत्सर्गकालेयो बलादाकृष्य-
वायुना ॥ स्तोकं स्तोकं त्यजेन्मूत्रमूर्ध्व
माकृष्यतत्पुनः ॥ १०१ ॥ गुरूपदिष्टमा-
र्गेण प्रत्यहं यः समाचरेत् ॥ बिन्दुसिद्धि-
र्भवेत्तस्य महासिद्धिप्रदायिका ॥ १०२ ॥

टीका-गुरूके उपदेश पूर्वक सर्वदा मूत्रत्यागनेके समय बलकरके वायुसे आकर्षणपूर्वक थोडा थोडा मूत्र त्यागकरे फिर ऊपरको आकर्षण करे तो उसका विन्दु सिद्ध होजायगा यह बिन्दुकी सिद्धी महासिद्धीकी दाताहै अर्थात् परमपदको प्राप्त करतीहै ॥१०१॥१०२॥

मूलं-षण्मासमभ्यसेद्यो वै प्रत्यहं गुरुशिक्षया ॥ शतांगनेपि भोगेपि तस्य बिन्दुर्न नश्यति ॥ १०३ ॥

टीका-गुरूके शिक्षापूर्वक योगी यदि छःमास नित्य इसका अभ्यासकरै तो शत स्त्रीसे भोगकरेगा तो भी उसका बिन्दुपात नहोगा ॥ १०३ ॥

मूलं-सिद्धे बिन्दौ महायत्ने किं न सिध्यति पार्वति ॥ ईशत्वं यत्प्रसादेन ममापि दुर्लभं भवेत् ॥ १०४ ॥

टीका-हेपार्वती जब महायत्नसे विन्दु सिद्ध होजायगा तब क्या नहीं सिद्धहोगा अर्थात् सब सिद्धहोजायगा इसके प्रसादसे यह दुर्लभ ईशत्व हमको प्राप्त भयाहै ॥ १०४ ॥

अथ शक्तिचालनमुद्रा ॥

मूलं-आधारकमले सुप्तां चालयेत्कुण्डलीं

दृढाम् ॥ अपानवायुमारुह्य बलादाकृष्य बुद्धिमान् ॥ १०५ ॥ शक्तिचालनमुद्रेयं सर्वशक्तिप्रदायिनी ॥ १०६ ॥

टीका—आधारकमलमें घोर निद्रित कुण्डलनीको बुद्धिमान् अपानवायुपर आरूढहोके आकर्षणपूर्वक हठात् चलावे अर्थात् भ्रमावे यह शक्तिचालनमुद्रा सर्वशक्तिकी दाताहै ॥ १०५ ॥ १०६ ॥

मूलं—शक्तिचालनमेवं हि प्रत्यहं यः समाचरेत् ॥ आयुर्वृद्धिर्भवेत्तस्य रोगाणां च विनाशनम् ॥ १०७ ॥

टीका—यह शक्तिचालनमुद्रा जो प्रतिदिनकरे तो उसके आयुकी वृद्धीहोगी और सर्वरोगोंका इस मुद्राके प्रभावसे नाश होजायगा ॥ १०७ ॥

मूलं—विहाय निद्रां भुजगी स्वयमूर्ध्वं भवेत्खलु ॥ तस्मादभ्यासनं कार्यं योगिना सिद्धिमिच्छता ॥ १०८ ॥

टीका—इस शक्ति चालनके साधनसे कुण्डलनी निद्राको त्यागके आपही ऊर्ध्वगामी होजायगी यह निश्चयहै इसहेतुसे सिद्धिकी इच्छा करनेवाले योगीको उचितहै कि इसका अभ्यासकरे ॥ १०८ ॥

मूलं–यः करोति सदाभ्यासं शक्तिचालन-मुत्तमं ॥ येन विग्रहसिद्धिः स्यादणिमा-दिगुणप्रदा ॥ गुरूपदेशविधिनातस्य मृ-त्युभयं कुतः ॥ १०९ ॥

टीका–यदि इस उत्तमशक्तिचालनमुद्राका सदा अभ्यासकरे तो उसका शरीर सिद्ध अर्थात् अमर हो-जायगा और यह मुद्रा अणिमादिक सिद्धिकी दाता है गुरुके उपदेशपूर्वक विधानसे जो इसका अभ्यास करे तो उसको मृत्युका भय नही है ॥ १०९ ॥

मूलं–मुहूर्तद्वयपर्यन्तं विधिना शक्तिचा-लनम् ॥११०॥यः करोति प्रयत्नेन तस्य सिद्धिरदूरतः ॥ युक्तासनेन कर्तव्यं यो-गिभिः शक्तिचालनम् ॥ १११ ॥

टीका–जो विधानपूर्वक यत्नसे यदि दोमुहूर्तपर्यंत शक्ति चालनकरे तो उसको सर्वसिद्धिकी प्राप्ति होगी योगीको उचितहैकि गुरूके उपदेशानुसार योग आसन से युक्तहोकें शक्तिचालनका अभ्यासकरे॥११०॥१११

मूलं–एतत्सुमुद्रादशकं न भूतं न भविष्य-ति ॥ एकैकाभ्यासने सिद्धिः सिद्धो भव-ति नान्यथा ॥ ११२ ॥

टीका-हेपार्वती यह दश मुद्रा जो हमने कहाहै इसके समान न कुछ भयाहै न होगा इसके एक एकके अभ्यास सिद्ध होनेसे साधक सिद्ध होजायगा ॥ ११२ ॥
॥ इतिश्रीशिवसंहितायां हरगौरीसंवादे मुद्राकथननामकश्चतुर्थपटलः समाप्तः ॥ ४ ॥

अथ पंचमः पटलः ॥

मूलं-श्रीदेव्युवाच ॥ ब्रूहि मे वाक्यमीशान परमार्थधियं प्रति ॥ ये विघ्नाः सन्ति लोकानां वद मे प्रिय शङ्कर ॥ १ ॥

टीका-श्रीपार्वतीजी कहती हैं कि हे ईश्वर हेप्रिय शङ्कर योगाभ्यासी लोगोंके प्रति जो विघ्न संसारमें हैं सो भक्तोंपर कृपा करके हमको कहो ॥ १ ॥

मूलं-ईश्वर उवाच ॥ शृणुदेवि प्रवक्ष्यामि यथा विघ्नाः स्थिताः सदा ॥ मुक्तिं प्रतिनराणाञ्च भोगः परमबन्धनः ॥ २ ॥

टीका-श्री ईश्वर कहतेहैं कि हेदेवी योग साधनमें जो विघ्नहैं सो हम कहते हैं सुनो मनुष्योंके मुक्तिके प्रति भोग परमबन्धनहै ॥ २ ॥

अथ भोगरूप योगविघ्नविद्याकथनं ॥

मूलं-नारी शय्यासनं वस्त्रं धनमस्य विड-

म्बनम् ॥ताम्बूलभक्षयानानि राज्यैश्वर्य-विभूतयः ॥३॥हैमं रौप्यं तथा ताम्रं रत्न-श्चागुरुधेनवः॥पाण्डित्यं वेदशास्त्राणि नृ-त्यंगीतं विभूषणम् ॥४॥ वंशी वीणा मृद-ङ्गाश्च गजेंद्रश्चाश्ववाहनम्॥दारापत्यानि विषया विघ्ना एते प्रकीर्तिताः ॥भोगरूपा इमे विघ्ना धर्म रूपानिमान् शृणु ॥ ५ ॥

टीका–नारीसंसर्ग शय्या उत्तमआसन वस्त्र धन यह सब मोक्षके प्रति विडम्बनाहै ताम्बूलसेवन रथ शिबिका आदि सवारी राज ऐश्वर्य भोग स्वर्ण रजत ताम्र अनेक प्रकारके रत्न गोधन आदिका संग्रह पा-ण्डित्य करना वेदशास्त्रमें तर्क करना नृत्य गीत भूषण वंशी वीणा मृदङ्गादिक वाद्य बजाना गज अश्व आदि वाहन स्त्री पुत्र केवल गुरुकी सेवा छोडके हे पार्वती यह जो कहाहै सो भोगरूप विघ्नहै अब धर्मरूप विघ्न कहतेहैं श्रवण करो ॥ ३ ॥ ४ ॥ ५ ॥

अथ धर्मरूपयोगाविघ्नकथनं॥

मूलं–स्नानं पूजाविधिर्होमं तथा मोक्ष मयी स्थितिः ॥ व्रतोपवासनियममौ-

नमिन्द्रियनिग्रहः ॥६॥ ध्येयो ध्यानं तथा मन्त्रो दानं ख्यातिर्दिशासु च॥ वापीकूपतडागादिप्रासादारामकल्पना ॥ ७ ॥ यज्ञं चान्द्रायणं कृच्छ्रं तीर्थानि विविधानि च॥ दृश्यन्ते च इमे विघ्ना धर्मरूपेण संस्थिताः॥ ८॥

टीका—स्नानविधि पूजा होम और सुखपूर्वक स्थिति व्रत उपवास नियम मौन इन्द्रियनिग्रह ध्येय किसी का ध्यान करना मन्त्र जप दान सर्वत्र प्रसिद्धहोना बावडी कूप तालाव मंदिर बगीचा आदिक बनवाना यज्ञ करना पापक्षयके हेतु चांद्रायण कृच्छ्र व्रत करना तीर्थोंमें भ्रमण करना यह सब धर्म रूप विघ्नहैं॥६।७।८

अथ ज्ञानरूपविघ्नकथनं ॥

मूलं—यत्तु विघ्नंभवेज्ज्ञानं कथयामि वरानने॥ ९ ॥ गोमुखं स्वासनं कृत्वा धौतिप्रक्षालनं च तत् ॥ नाडीसञ्चारविज्ञानं प्रत्याहारनिरोधनम्॥ १०॥ कुक्षिसंचालनं क्षिप्रं प्रवेश इन्द्रियाध्वना ॥ नाडीकर्माणि कल्याणि भोजनं श्रूयतां मम ॥ ११॥

टीका—हे देवी हे वरानने अब ज्ञानरूप विघ्न कहतेहैं

सुनो अन्तःशुद्धिके अर्थ गोमुखके सदृश वस्त्र भक्षण करके तब धौति प्रक्षालन करना अर्थात् धौतियोग करना नाडीचालनका ज्ञान वायुका प्रत्याहर निरोध करना कुण्डलनीके बोधार्थ उदरको भ्रमावना इन्द्रिय-द्वारा शीघ्र प्रवेश नाडीकर्म अर्थात् नाडी शुद्धिके हेतु आहारीय विचार यह सब ज्ञानरूप विघ्नहैं हेदेवी क-ल्याणी नाडीशुद्धीके अर्थ जो भोजनविधि हैं सो हम कहतेहैं सुनो ॥ ९ ॥ १० ॥ ११ ॥

मूलं–नवधातुरसं छिन्धि शुण्ठिकास्ताड-
येत् पुनः ॥ एककालं समाधिः स्याल्लिंग-
भूतमिदं शृणु ॥ १२ ॥

टीका–नवीन रस सहित भोजन वस्तु और शुण्ठो-चूर्ण भोजनकरे इससे शीघ्र समाधि होजायगी हे देवी अब उसका चिह्न कहतेहैं सुनो ॥ १२ ॥

मूलं–सङ्गमं गच्छ साधूनां सङ्कोचं भज दु-
र्जनात् ॥ प्रवेशनिर्गमे वायोर्गुरुलक्षं
विलोकयेत् ॥ १३ ॥

टीका–साधुके सङ्गकी अभिलाषा और दुर्जनसे अ-लगरहनेका विचार रखना और वायुका निर्गममें प्रवे-श करना और वायुके निरोध समय मात्रासे गुरुलघुके विचारार्थ संख्या करना ॥ १३ ॥

मूलं–पिण्डस्थं रूपसंस्थञ्च रूपस्थं रूपव-
र्जितम् ॥ ब्रह्मैतस्मिन्मतावस्था हृदयञ्च
प्रशाम्यति ॥ इत्येते कथिता विघ्ना ज्ञान-
रूपे व्यवस्थिताः ॥ १४ ॥

टीका–शरीरस्थरूपका विचार रखना और रूप कु-
रूपका निर्णय करना और यह जगत् ब्रह्महै ऐसे वि-
चारसे हृदयमें स्थिरता रखना हेपार्वती यह जो कहा
है सो सब ज्ञानरूप विघ्नहैं ॥ १४ ॥

अथ चतुर्विधयोगकथनम् ॥

मूलं–मन्त्रयोगो हठश्चैव लययोगस्तृतीय-
कः ॥ चतुर्थो राजयोगः स्यात्स द्विधा
भाववर्जितः ॥ १५ ॥

टीका–योग चार प्रकारकाहै मन्त्रयोग हठयोग
और तीसरा लययोग और चौथा राजयोगहै यह राज-
योग द्वैत भावसे रहितहै अर्थात् राजयोग सिद्धहो
जानेसे जीव ईश्वरमें लयहोजाताहै और कुछ बोध नहीं
होता ॥ १५ ॥

मूलं–चतुर्धा साधको ज्ञेयो मृदुमध्याधि-
मात्रकाः ॥ अधिमात्रतमः श्रेष्ठो भवा-
ब्धौ लंघनक्षमः ॥ १६ ॥

टीका–यहयोगचतुष्टयके साधकभी चार प्रकारके होते हैं अर्थात् मृदु मध्यम अधिमात्र और अधिमात्र-तम यह अधिमात्रतम साधक सबमें श्रेष्ठ है एही साधक संसाररूपी समुद्रके पार होनेमें समर्थ होताहै॥१६॥

अथ मृदुसाधकलक्षणम् ॥

मूलं–मन्दोत्साही सुसंमूढो व्याधिस्थो गुरुदूषकः ॥ लोभी पापमतिश्चैव बह्वाशी वनिताश्रयः॥१७॥ चपलः कातरो रोगी पराधीनोऽतिनिष्ठुरः ॥ मन्दाचारो मन्दवीर्यो ज्ञातव्यो मृदुमानवः॥१८॥ द्वादशाब्दे भवेत्सिद्धिरेतस्य यत्नतः परम् ॥ मन्त्रयोगाधिकारी स ज्ञातव्यो गुरुणा ध्रुवम्॥१९॥

टीका–अब मृदुसाधकलक्षण कहतेहैं मन्द उत्साही मूढ चित्त व्याधिग्रसित गुरुनिन्दक लोभी जिसकी सर्वदा पापबुद्धिरहै बहुत भोजन करनेवाला स्त्रीके वशमेंहो चञ्चलहो कातरहो रोगीहो पराधीनहो कठोर बोलनेवालाहो जिसके मन्द कर्महों मंदवीर्यवालाहो ऐसे पुरुषको मृदुमानव कहतेहैं यह मन्त्रयोगका अधिकारीहै यत्न करनेसे और गुरुके कृपासे इसकोभी

बारह वर्षमें सिद्धि प्राप्त होगी ॥ १७ ॥ १८ ॥ १९ ॥

मूलं–समबुद्धिः क्षमायुक्तः पुण्यकांक्षी प्रियव्वँदः ॥ मध्यस्थः सर्वकार्येषु सामान्यः स्यान्न संशयः ॥ २० ॥ एतज्ज्ञात्वैव गुरुभिर्दीयते मुक्तितो लयः ॥ २१ ॥

टीका–अब मध्यसाधक लक्षण कहतेहैं सामान्य बुद्धिहो क्षमावानहो पुण्यकर्म करनेमें इच्छा रखताहो प्रियबोलताहो सर्वकार्यमें मध्यस्थ रहताहो अर्थात् न हर्ष न विषाद इसको मध्य साधक कहतेहैं यह निश्चयहै गुरु इसको विचारके मुक्ति मार्ग जो लय योगहै उसका उपदेशकरे ॥ २० ॥ २१ ॥

अथ अधिमात्रसाधकलक्षणम् ॥

मूलं–स्थिरबुद्धिर्लये युक्तः स्वाधीनो वीर्यवानपि ॥ महाशयो दयायुक्तः क्षमावान् सत्यवानपि ॥ २२ ॥ शूरो वयस्थः श्रद्धावान् गुरुपादाब्जपूजकः ॥ योगाभ्यासरतश्चैव ज्ञातव्यश्चाधिमात्रकः ॥ २३ ॥ एतस्य सिद्धिः षड्वर्षैर्भवेदभ्यासयोगतः ॥ एतस्मै दीयते धीरो हठयोगश्च साङ्गतः २४

टीका–यह अधिमात्र साधक लक्षण कहतेहैं स्थिर

बुद्धिहो लययोगमें समर्थहो स्वतन्त्रहो अर्थात् किसीके आधीन नहो वीर्यवानहो महाशयहो दयावानहो क्षमा-वानहो सत्यवादीहो शूरहो समाधियोगमें श्रद्धाहो गुरुपादपद्म पूजकहो योगाभ्यासरतहो ऐसे गुणवाले पुरुषको अधिमात्र कहतेहैं योगअभ्याससे ऐसे पुरुष-को छःवर्षमें सिद्धि प्राप्त होगी गुरुको उचितहै कि ऐसे धीर पुरुषको अङ्गसहित हठयोगका उपदेश करें ॥ २२ ॥ २३ ॥ २४ ॥

अथ अधिमात्रतमसाधकलक्षणम् ॥

मूलं–महावीर्यान्वितोत्साही मनोज्ञः शौ-र्यवानपि॥शास्त्रज्ञोऽभ्यासशीलश्च निर्मो-हश्च निराकुलः॥२५॥ नवयौवनसम्पन्नो मिताहारी जितेंद्रियः॥ निर्भयश्च शुचि-र्दक्षो दाता सर्वजनाश्रयः ॥ २६ ॥ अधि-कारी स्थिरो धीमान् यथेच्छावस्थितः क्षमी॥ सुशीलो धर्मचारी च गुप्तचेष्टः प्रि-यँव्वदः ॥ २७ ॥ शास्त्रविश्वाससम्पन्नो देवतागुरुपूजकः॥ जनसंगविरक्तश्च म-हाव्याधिविवर्जितः ॥ २८॥ अधिमात्र-तरो ज्ञेयः सर्वयोगस्य साधकः॥ त्रिभिः

सँवत्सरैः सिद्धिरेतस्य नात्र संशयः ॥
सर्वयोगाधिकारी स नात्र कार्या विचा-
रणा ॥ २९ ॥

टीका–महावीर्यवान उत्साहयुक्त स्वरूपवान शूर-
तासम्पन्न शास्त्रज्ञ अभ्यासशील अर्थात् श्रुतिधर मो
हसे हीन आकुलतारहित अर्थात् सावधान नवीन
यौवनसम्पन्न अर्थात् तरुण प्रमाणभोजी जितेन्द्रिय
निर्भय पवित्र आचार सर्वकर्ममें निपुण दानशील
शरणागतपालक स्थिरचित्त बुद्धिमान सन्तोषयुक्त
क्षमावान शीलवान धार्मिक कर्मोंको गोप्य रखनेवाला
प्रियसत्यवादी शास्त्रमें विश्वास देवता और गुरुपूजक
जनसङ्गरहित महाव्याधिरहित ऐसे गुण जिसमें हों
वह अधिमात्रतर है और सर्वयोगका साधकहै इसको
तीनवर्षमें सिद्धि प्राप्त होगी इसमें संशय नहींहै यह
सर्वयोगका अधिकारी है ऐसे पुरुषको गुरु समस्त
योगका उपदेश करदें इसमें विचारका कुछ प्रयोजन
नहींहै ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥

अथ प्रतीकोपासनम् ॥

मूलं–प्रतीकोपासना कार्या दृष्टादृष्टफल-
प्रदा ॥ पुनाति दर्शनादत्र नात्र कार्या
विचारणा ॥ ३० ॥

टीका-अब प्रतीकउपासना कहतेहैं प्रतीकउपासनासे दृष्टादृष्टफल लाभ होताहै और उसके दर्शनसे मनुष्य पवित्र होताहै इसमें संशय नहींहै ॥ ३० ॥

मूलं-गाढातपे स्वप्रतिबिम्बितेश्वरं निरीक्ष्य विस्फारितलोचनद्वयम्॥ यदा नभः पश्यति स्वप्रतीकं नभोंगणे तत्क्षणमेव पश्यति ॥ ३१ ॥

टीका-गाढ आतपमें अर्थात् गहरेधूपमें स्वईश्वरका प्रतिबिम्ब नेत्रस्थिरकरके देखे जब अपने छायाका प्रतिबिम्ब शून्यमें देखपडे तब ऊपर आकाशमें अपने प्रतिबिम्ब अवश्य देखेगा ॥ ३१ ॥

मूलं-प्रत्यहं पश्यते यो वै स्वप्रतीकं नभोङ्गणे ॥आयुर्वृद्धिर्भवेत्तस्य न मृत्युः स्यात्कदाचन ॥ ३२ ॥

टीका-जो नित्य आकाशमें स्वप्रतीक अर्थात् अपना प्रतिबिम्ब देखेगा उसके आयुकी वृद्धि होगी और उसकी मृत्यु कभी न होगी अर्थात् चिरंजीवी हो जायगा ॥ ३२ ॥

मूलं-यदापश्यतिसम्पूर्णस्वप्रतीकं नभो-

ङ्गणे॥ तदा जयं सभायाञ्च युद्धे निर्जित्य सञ्चरेत्॥ ३३ ॥

टीका-जब सम्पूर्ण अपना प्रतिविम्ब आकाशमें देखे तब सभामें उसकी जय होय और युद्धमें शत्रुको जीतलेगा ॥ ३३ ॥

मूलं-यःकरोति सदाभ्यासं चात्मानं वन्द ते परम् ॥ पूर्णानन्दैकपुरुषं स्वप्रतीकप्रसादतः ॥ ३४ ॥

टीका-जो सर्वदा स्वप्रतीक उपासनाका अभ्यास करे तो उसको आत्माकी प्राप्ति होगी और उसी स्वप्रतीकके प्रसादसे पूर्णानन्द स्वरूप अर्थात् आत्माका दर्शन होगा तात्पर्य यहहै कि जब हृदयाकाशमें अपनें स्वरूपका अनुभव होगा तब आत्माकी परम ज्योतिका प्रकाश होगा ॥ ३४ ॥

मूलं-यात्राकाले विवाहे च शुभे कर्मणि सङ्कटे॥ पापक्षये पुण्यवृद्धौ प्रतीकोपासनञ्चरेत् ॥३५॥

टीका-यात्राकालमें और विवाहके समयमें और शुभकर्ममें और पुण्यवृद्धिके अर्थ स्वप्रतीक अर्थात् अपने प्रतिबिम्बका दर्शन करे तो सर्वदा कल्याण होगा ॥ ३५ ॥

मूलं-निरन्तरकृताभ्यासादन्तरे पश्यति ध्रुवम् ॥ तदा मुक्तिमवाप्नोति योगी नियतमानसः ॥ ३६ ॥

टीका-सर्वदा प्रतीकोपासनाके अभ्यास करनेसे निश्चय हृदयाकाशमें अपना प्रतिबिंब भान होगा तब निश्चयआत्मा योगीको मुक्ति प्राप्त होगी ॥ ३६ ॥

मूलं-अंगुष्ठाभ्यामुभे श्रोत्रे तर्जनीभ्यां द्विलोचने ॥ नासारन्ध्रे च मध्याभ्यामनामाभ्यां मुखं दृढम् ॥ ३७ ॥ निरुध्य मारुतं योगी यदैव कुरुते भृशं ॥ तदा तत्क्षणमात्मानं ज्योतीरूपं स पश्यति॥३८॥

टीका-दोनों अङ्गुष्ठसे दोनों कर्ण बंद करे और दोनों तर्जनीसे दोनों नेत्रको बंद करे और दोनों मध्यमा अङ्गुलीसे दोनों नासारंध्रको बंद करे और दोनों अनामिका अङ्गुली और कनिष्ठासे मुखको बंद करे यदि इसप्रकार योगी वायुको निरोध करके इसका वारंवार अभ्यास करे तो आत्मा ज्योतिस्वरूपका हृदयाकाशमें भान होगा ॥ ३७ ॥ ३८ ॥

मूलं-तत्तेजो दृश्यते येन क्षणमात्रं निराकुलम् ॥ सर्वपापविनिर्मुक्तः स याति परमां गतिम् ॥ ३९ ॥

टीका—आत्माका यह परमतेज जो पुरुष स्थिर-चित्त होके क्षणमात्रभी देखेगा वह सर्वपापसे मुक्तहोके परमगतिको प्राप्तहोगा ॥ ३९ ॥

मूलं—निरन्तरकृताभ्यासाद्योगीविगतक-ल्मषः ॥ सर्वदेहादि विस्मृत्य तदभिन्नः स्वयं गतः ॥ ४० ॥

टीका—निरंतर जो योगी शुद्धचित्त होके यह प्रतीकोपासनाका अभ्यास करेगा वह सर्व देहादिक-र्मसे रहित होके आत्मासे अभिन्न होजायगा अर्थात् आत्मस्वरूप होजायगा ॥ ४० ॥

मूलं—यः करोति सदाभ्यासं गुप्ताचारेण मानवः ॥स वै ब्रह्मविलीनः स्यात्पापकर्म रतो यदि ॥ ४१ ॥

टीका—जो मनुष्य गुप्ताचारसे इसका सर्वदा अभ्यास करताहै सो यदि पापकर्मरतभीहो तथापि उसका मोक्ष होगा ॥ ४१ ॥

मूलं—गोपनीयः प्रयत्नेन सद्यः प्रत्ययका-रकः ॥ निर्वाणदायको लोके योगोयं मम वल्लभः ॥ नादः संजायते तस्य क्रमे-णाभ्यासतश्च यः ॥ ४२ ॥

टीका—जो इसका अभ्यास करेगा उसको क्रमसे नाद उत्पन्न होगा हेदेवी यह प्रतीकोपासना निर्वाण योगका दाताहै इसहेतुसे हमको अतिप्रियहै यह शीघ्र फल दाताहै इसको यत्नसे गोप्य रखना उचितहै ॥ ४२ ॥

मूलं—मत्तभृङ्गवेणुवीणासदृशः प्रथमोध्वनिः ॥ ४३ ॥ एवमभ्यासतः पश्चात् संसारध्वान्तनाशनम् ॥ घण्टानादसमः पश्चात् ध्वनिर्मेघरवोपमः ॥ ४४ ॥ ध्वनौ तस्मिन्मनो दत्त्वा यदा तिष्ठति निर्भरः ॥ तदा संजायते तस्य लयस्य मम वल्लभे॥४५॥

टीका—योग अभ्यासद्वारा प्रथम मत्त भ्रमरकी नाई शब्द और वेणु और वीणाके समान शब्द उत्पन्न होगा इसी तरह योग अभ्यास संसारतम नाशकसे फिर घंटानाद समान शब्द होगा फिर मेघ गर्जनिके समान ध्वनि होगी हे प्रिय पार्वती उस ध्वनिमें यदि मन निश्चल स्थित हो जाय तब मोक्षका दाता लय उत्पन्न होगा ॥ ४३ ॥ ४४ ॥ ४५ ॥

मूलं—तत्र नादे यदा चित्तं रमते योगिनो भृशं ॥ विस्मृत्य सकलं बाह्यं नादेन सह शाम्यति ॥ ४६ ॥

टीका जब योगीका चित्त उस नादमें निरंतर रम णकरेगा तब सकल विषयसे स्मरण रहित होके चित्त समाधिमें लय होजायगा ॥ ४६ ॥

मूलं–एतदभ्यासयोगेन जित्वा सम्यक् गुणान् बहून् ॥ सर्वारम्भपरित्यागी चिदाकाशे विलीयते ॥ ४७ ॥

टीका–इसी प्रकार योग अभ्यास द्वारा सर्व गुणोंको जीतके और सब कार्योंके आरंभको त्यागके योगी आनंदपूर्वक चैतन्यस्वरूप हृदयाकाशमें लय होजायगा ॥ ४७ ॥

मूलं–नासनं सिद्धसदृशं न कुम्भसदृशं बलम् ॥ न खेचरीसमा मुद्रा न नादसदृशो लयः ॥ ४८ ॥

टीका–हेदेवी सिद्धासनके समान कोई और आसन नहीं है और न कुम्भकके समान कोई बलहै और न खेचरीके समान कोई मुद्राहै और न नादके समान कोई दूसरा लयहै ॥ ४८ ॥

अथ मूलाधारपद्मविवरणम् ॥

मूलं–इदानीं कथयिष्यामि मुक्तस्यानुभवं

प्रिये॥ यज्ज्ञात्वा लभते मुक्तिं पापयुक्तोऽपि साधकः ॥ ४९ ॥

टीका-हेप्रिये पार्वती अब मुक्तिका अनुभव तुमसे कहतेहैं जिसके ज्ञानसे पापयुक्त साधकभी मुक्तिलाभ करताहै ॥ ४९ ॥

मूलं-समभ्यर्च्येश्वरं सम्यक् कृत्वा च योगमुत्तमम्॥ गृह्णीयात्सुस्थितो भूत्वा गुरुं सन्तोष्य बुद्धिमान् ॥ ५० ॥

टीका-योगकांक्षी साधक सम्यक्प्रकारसे ईश्वरकी पूजा करके स्वस्थचित्तसे योगासनपर बैठके बुद्धिमान गुरुको सर्व प्रकारसे प्रसन्न करके यह उत्तम योग ग्रहणकरे ॥ ५० ॥

मूलं-जीवादि सकलं वस्तु दत्त्वा योगविदं गुरुं ॥ सन्तोष्यादिप्रयत्नेन योगोयं गृह्यते बुधैः ॥ ५१ ॥

टीका-बुद्धिमान साधक जीवादि सकल पदार्थ योगविद गुरूके अर्पण करके उनके प्रसन्नतापूर्वक यत्न करके यह योग ग्रहण करते हैं ॥ ५१ ॥

मूलं-विप्रान् सन्तोष्य मेधावी नानामंगलसंयुतः ॥ ममालये शुचिर्भूत्वा गृह्णीयाच्छुभमात्मनः ॥ ५२ ॥

टीका-योगग्रहणके समय बुद्धिमान् साधक ब्राह्मणको सन्तोष करके अर्थात् द्रव्यादिक प्रदानपूर्वक प्रसन्न करके अनेक आशिर्वाद श्रवण करके पवित्रतासे शिवमंदिरमें बैठके आत्माके अर्थ जो यह शुभयोग है इसको ग्रहणकरे ॥ ५२ ॥

मूलं-संन्यस्यानेन विधिना प्राक्तनं विग्रहादिकम् ॥ भूत्वा दिव्यवपुर्योगी गृह्णीयात् वक्ष्यमाणकम् ॥ ५३ ॥

टीका-साधक इस विधानसे पूर्व शरीर गुरूके कृपासे त्यागके दिव्य शरीर होके जो आगे कहेंगे वह योग ग्रहण करे तात्पर्य यहहैकि योग ग्रहणके समयसे साधकका शरीर दिव्य होजाताहै व्याधि और अज्ञानका शरीर नहीं रहजाता इसहेतुसे योग ग्रहणके समय साधक यह चिंतनकरे कि पूर्व शरीरको हमने त्यागके दिव्यशरीर धारण किया ॥ ५३ ॥

मूलं-पद्मासनस्थितो योगी जनसंगविवर्जितः ॥ विज्ञाननाडीद्वितयमङ्गुलीभ्यां निरोधयेत् ॥ ५४ ॥

टीका-योगी संगरहित पद्मासनमें स्थितहोके दोनों विज्ञाननाडी अर्थात् इडा और पिंगलाको दो अंगुलीसे निरोध करे ॥ ५४ ॥

मूलं–सिद्धेस्तदाविर्भवति सुखरूपी निरञ्जनः॥ तस्मिन् परिश्रमः कार्यो येन सिद्धो भवेत् खलु॥ ५५॥

टीका–यह योग सिद्ध होनेसे साधकके हृदयमें सुखरूपी निरंजन परब्रह्म चैतन्यस्वरूपका प्रकाशहोगा इसहेतुसे यह योगमें साधकको परिश्रम कर्तव्यहै इससे निश्चय यह योग सिद्ध होजायगा॥ ५५॥

मूलं–यः करोति सदाभ्यासं तस्य सिद्धिर्न दूरतः॥वायुसिद्धिर्भवेत्तस्य क्रमादेव न संशयः॥ ५६॥

टीका–जोमनुष्य इस योगका सर्वदा अभ्यास करेगा उसको सर्वसिद्धि प्राप्त होगी और निश्चय आपही क्रमसे वायु सिद्ध होजायगा॥ ५६॥

मूलं–सकृद्यः कुरुते योगी पापौघं नाशयेद्ध्रुवं॥ तस्य स्यान्मध्यमे वायोः प्रवेशो नात्र संशयः॥ ५७॥

टीका–जो योगी प्रतिदिन एकवार यह अभ्यास करे तो उसके सर्वपापोंका नाश होजायगा और उसका प्राणवायु निश्चय सुषुम्णामें प्रवेश करेगा॥ ५७॥

मूलं–एतदभ्यासशीलो यः स योगी देवपू-

जितः ॥ अणिमादिगुणान् लब्ध्वा विचरे-द्भुवनत्रये ॥ ५८ ॥

टीका—यह अभ्यासशील योगी देवतोंसे पूजितहै और अणिमादिक सिद्धि लाभ करके तीनोंलोकमें इ-च्छापूर्वक विचरेगा ॥ ५८ ॥

मूलं—यो यथास्यानिलाभ्यासात्तद्भवेत्तस्य विग्रहः॥तिष्ठेदात्मनि मेधावी संयुतः क्री-डते भृशम् ॥ ५९ ॥

टीका—जिस प्रकार वायुका अभ्यास करेगा उसी तरह साधकका शरीर सिद्ध हो जायगा और बुद्धिमान पुरुष आत्मामें स्थितहोके सर्वदा क्रीडा करेगा॥५९॥

मूलं—एतद्योगं परं गोप्यं न देयं यस्य क-स्यचित् ॥ सप्रमाणैः समायुक्तस्तमेव कथ्यते ध्रुवम् ॥ ६० ॥

टीका—यह योग परम गोपनीयहै अनधिकारीको कदापि देनेके योग्य नहीं है परन्तु प्रमाणयुक्त अर्थात पूर्वोक्त लक्षणयुक्त साधकको अवश्य देना उचितहै६०॥

मूलं—योगी पद्मासने तिष्ठेत् कण्ठकूपे य-दास्मरन् ॥जिह्वां कृत्वा तालुमूले क्षुत्पि-पासा निवर्तते ॥ ६१ ॥

टीका—पद्मासन स्थित योगी जब कण्ठकूपका स्मरण अर्थात् उस स्थानमें मनको लय करके जिह्वा को तालुमूलमें स्थित करेगा तब क्षुधा और पिपासा से रहित हो जायगा ॥ ६१ ॥

मूलं—कण्ठकूपादधः स्थाने कूर्मनाड्यस्ति शोभना॥तस्मिन् योगी मनो दत्त्वा चित्त स्थैर्यं लभेद्भृशम् ॥ ६२ ॥

टीका—कण्ठकूपके नीचे कूर्मनाडी शोभितहै उस नाडीमें योगी मनको स्थिर करके अत्यंत चित्तकी स्थिरता पावेगा ॥ ६२ ॥

मूलं—शिरः कपाले रुद्राक्षं विवरं चिन्तयेद्य दा॥तदा ज्योतिःप्रकाशः स्याद्विद्युत्पुञ्जसमप्रभः ॥६३॥ एतच्चिन्तनमात्रेण पापानां संक्षयो भवेत्॥दुराचारोऽपि पुरुषो लभते परमं पदम् ॥६४॥

टीका—शिर और कपालमें जो रुद्राक्ष विवरहै उसमें यदि चिंतना करे तो विद्युत्पुञ्जके समान आत्मज्योतिका प्रकाश होगा और इसके चिन्तन मात्रसे योगीका सर्व पाप नष्ट होजायगा यदि दुराचारमेंभी जो पुरुष आसक्तहै वहभी परम गतिको प्राप्त होगा ॥६३॥६४॥

मूलं–अहर्निशं यदा चिन्तां तत्करोति वि-
चक्षणः ॥ सिद्धानां दर्शनं तस्य भाषणञ्च
भवेद्ध्रुवम् ॥ ६५ ॥

टीका–जो बुद्धिमान साधक रात्रि दिवस यह चि-
न्तवन करतेहैं उनको सिद्ध लोगोंका अवश्य दर्शन
और उनसे भाषण होताहै ॥ ६५ ॥

मूलं–तिष्ठन् गच्छन् स्वपन् भुञ्जन् ध्याये-
च्छून्यमहर्निशम् ॥ तदाकाशमयो योगी
चिदाकाशे विलीयते ॥ ६६ ॥

टीका–जो पुरुष चलते बैठे सोते भोजन करते रा-
त्रिदिवस यह ध्यान करतेहैं सो आकाशस्वरूप योगी
चिदाकाश अर्थात् परमात्मामें लय होजातेहैं ॥ ६६ ॥

मूलं–एतज्ज्ञानं सदाकार्यं योगिना सिद्धि-
मिच्छता ॥ निरन्तरकृताभ्यासान्मम
तुल्यो भवेद्ध्रुवम् ॥ एतज्ज्ञानबलाद्योगी
सर्वेषां वल्लभो भवेत् ॥ ६७ ॥

टीका–सिद्धिकांक्षी योगीको इस ध्यानका सर्वदा
अभ्यास करना उचितहै सर्वदा अभ्यास करनेसे हे-
पार्वती हमारे तुल्य होजायगा निश्चय इस ज्ञानबलसे
योगी सबको अर्थात् त्रैलोक्यको प्रिय होजाताहै ॥ ६७ ॥

मूलं—सर्वान् भूतान् जयं कृत्वा निराशी रपरिग्रहः ॥ ६८ ॥ नासाग्रे दृश्यते येन पद्मासनगतेन वै ॥ मनसो मरणं तस्य खेचरत्वं प्रसिद्ध्यति ॥ ६९ ॥

टीका—योगी सर्व भूतोंको जय करके और क्षुधा और इच्छाको जीतके पद्मासनसे स्थितहोके जो नासाग्रमें देखताहै उसका मन स्थिर होजाताहै तब खेचरत्व सिद्धहोताहै ॥ ६८ ॥ ६९ ॥

मूलं—ज्योतिः पश्यति योगीन्द्रः शुद्धं शुद्धाचलोपमम् ॥ तत्राभ्यासबलेनैव स्वयं तद्रक्षको भवेत् ॥ ७० ॥

टीका—शुद्ध अचलके समान परमज्योति योगी देखताहै तब अभ्यासबलसे आपही उसका रक्षकहोताहै अर्थात् ज्योति देखनेके अभ्यासकी रक्षा करताहै॥ ७०॥

मूलं—उत्तानशयने भूमौ सुप्त्वा ध्यायन्निरन्तरं ॥ सद्यः श्रमविनाशाय स्वयं योगी विचक्षणः ॥ ७१ ॥ शिरः पश्चात्तु भागस्यध्याने मृत्युञ्जयो भवेत् ॥ भ्रूमध्ये दृष्टिमात्रेण ह्यपरः परिकीर्तितः ॥ ७२ ॥

टीका—बुद्धिमान् योगी भूमिमें उत्तानशयन करके निरन्तर ध्यान करे तो तत्काल आपही श्रमका नाश होजायगा और शिरके पृष्ठभागका ध्यान करनेसे योगी मृत्युका जीतनेवाला होजायगा और भूके मध्यमें जो दृष्टिमात्रसे फल होताहै सो हेदेवि हम पहले कहचुकेहैं ॥ ७१ ॥ ७२ ॥

मूलं—चतुर्विधस्य चान्नस्य रसस्त्रेधा विभज्यते ॥ तत्र सारतमो लिंगदेहस्य परिपोषकः ॥ ७३ ॥ सप्तधातुमयं पिण्डमेति पुष्णाति मध्यगः ॥ याति विण्मूत्ररूपेण तृतीयः सप्ततो बहिः ॥ ७४ ॥ आद्यभागं द्वयं नाड्यः प्रोक्तास्ताः सकला अपि ॥ पोषयन्ति वपुर्वायुमापादतलमस्तकम् ॥ ७५ ॥

टीका—चार विधि अन्नभोजन करनेसे तीनप्रकारका रस उत्पन्नहोताहै उसमें जो प्रथम सारभूत रसहै वह लिङ्गशरीरको पोषण करताहै और जो दूसरा रसहै वह सप्तधातुमय पिण्डको पोषण करताहै और तीसरा रस सप्त धातुके बाहर मल मूत्र रूपहै पहिले जो दोभाग रस कहाहै वही सकल नाडीरूपहैं और

पादसे लेकर मस्तकपर्यंत शरीरके वायुका पोषणक-
रते हैं ॥ ७३ ॥ ७४ ॥ ७५ ॥

मूलं-नाडीभिराभिः सर्वाभिर्वायुः सञ्चरते
यदा ॥ तदैवान्नरसो देहे साम्येनेह प्रव-
र्त्तते ॥ ७६ ॥

टीका-जब सब नाडीके साथ वायु चलताहै तब
अन्नका रस शरीरमें सम भावसे प्रवृत्त होताहै ॥ ७६॥

मूलं-चतुर्दशानां तत्रेह व्यापारे मुख्यभा-
गतः ॥ ता अनुग्रत्वहीनाश्च प्राणसञ्चार-
नाडिकाः ॥ ७७ ॥

टीका-सर्व नाडियोंमें पूर्वोक्त चौदह नाडी शरीर
के मुख्य व्यापारके करताहैं यह प्राण सञ्चार करने-
वाली चौदह नाडीमें परस्पर कोई किसीसे न्यून
अधिक नहीं है ॥ ७७ ॥

मूलं-गुदाद्व्यंगुलतश्चोर्ध्वं मेढ्रैकांगुलत-
स्त्वधः॥ एवञ्चास्ति समं कन्दं समता च-
तुरंगुलम् ॥ ७८ ॥

टीका-गुदासे दो अङ्गुल ऊपर और मेढ्र अर्थात्
लिङ्गमूलसे एक अंगुल नीचे चार अंगुल विस्तारक-
न्दका प्रमाणहै ॥ ७८ ॥

मूलं-पश्चिमाभिमुखी योनिर्गुदमेढ्रान्तरालगा॥तत्र कन्दं समाख्यातं तत्रास्ति कुण्डली सदा ॥ ७९ ॥ संवेष्ट्य सकला नाडीः सार्द्धत्रिकुटिलाकृतिः ॥ मुखेनिवेश्य सा पुच्छं सुषुम्णाविवरे स्थिता॥८०॥

टीका-गुदा और मेढ्रके मध्यमें जो योनिहै वह पश्चिमामुखी अर्थात् पीछेको मुखहै उसी स्थानमें कन्दहै और उसी स्थानमें सर्वदा कुण्डलनीकी स्थितिहै यह कुण्डलनी सकल नाडीको घेरके साढे तीन फेरा कुटिल आकृतिसे अपने मुखमें पुच्छको लेके सुषुम्णा विवरमें स्थितहै ॥ ७९ ॥८० ॥

मूलं-सुप्तानागोपमाह्येषा स्फुरन्ती प्रभया स्वया ॥ अहिवत् सन्धिसंस्थाना वाग्देवी बीजसंज्ञिका ॥ ८१ ॥

टीका-यह कुण्डलिनी सर्पके समान निद्रिता अपने प्रभासे प्रकाशमानहै और सर्पके सदृश संधिमें स्थितहै और वाग्देवी है अर्थात् कुण्डलनीहीसे वाक्य उच्चारण होताहै और बीज संज्ञकहै अर्थात् संसारकी बीजहै ॥ ८१ ॥

मूलं-ज्ञेया शक्तिरियं विष्णोर्निर्मला स्वर्ण-

भास्वरा॥सत्त्वं रजस्तमश्चेति गुणत्रयप्र-
सूतिका ॥ ८२ ॥

टीका—यह कुण्डलनी देवी ईश्वरकी शक्तिमें तप्त स्वर्णके समान निर्मल तेजप्रभाहै और सत्व रज तम यह तीनों गुणकी माताहै ॥ ८२ ॥

मूलं—तत्र बन्धूकपुष्पाभं कामबीजं प्रकी-
र्तितम्॥ कलहेमसमं योगे प्रयुक्ताक्षररू-
पिणम् ॥ ८३ ॥

टीका—जिस स्थानमें कुण्डलनी है उसी स्थानमें बन्धूकपुष्पके समान रक्तवर्ण कामबीजकी स्थिति कहीगई है वह कामबीज तप्तस्वर्णके समान स्वरूप-योगयुक्त द्वारा चिंतनीयहै ॥ ८३ ॥

मूलं—सुषुम्णापि च संश्लिष्टो बीजं तत्र वरं
स्थितं ॥ शरच्चंद्रनिभं तेजस्स्वयमेतत्स्फु-
रत्स्थितम्॥८४॥सूर्यकोटिप्रतीकाशं च-
न्द्रकोटिसुशीतलम् ॥एतत्त्रयं मिलित्वैव-
देवी त्रिपुरभैरवी॥बीजसंज्ञं परंतेजस्तदे-
वपरिकीर्तितम् ॥ ८५ ॥

टीका—जिस स्थानमें कुंडलिनी स्थितहै सुषुम्णा उसीस्थानमें कामबीजके साथ स्थितहै और वह बीज

शरदचन्द्रके समान प्रकाशमान तेजहै और वह आप ही कोटि सूर्यके समान प्रकाश और कोटि चंद्रके समान शीतलहै यह तीनों मिलके अर्थात् कुण्डलिनी-सुषुम्णा बीजकुण्डलिनीका नाम त्रिपुरभैरवी देवी है यह कुण्डलिनी परमतेजमानहै और इसको बीजसंज्ञाहै।८४।८५।

मूलं-क्रियाविज्ञानशक्तिभ्यां युतं यत्परि
तोभ्रमत् ॥ ८६ ॥ उत्तिष्ठद्विशतस्त्वम्भः
सूक्ष्मं शोणशिखायुतं ॥ योनिस्थं तत्परं
तेजः स्वयंभूलिंगसंज्ञितम् ॥ ८७ ॥

टीका-वह बीज क्रियाशक्ति और ज्ञानशक्तिसे युक्त होके शरीरमें भ्रमण करताहै और कभी उर्ध्वगामी होताहै और कभी जलमें प्रवेश करताहै और सूक्ष्म प्रज्वलित अग्निके समान शिखायुत परमतेज वीर्यकी स्थिति योनिस्थानमें है और स्वयम्भू लिङ्गसंज्ञाहै ॥८६॥८७॥

मूलं--आधारपद्ममेतद्धियोनिर्यस्यास्ति
कन्दतः ॥ परिस्फुरत् वादिसान्तचतुर्वर्णं
चतुर्दलम् ॥ ८८ ॥

टीका-यह जो कहाहै इसको आधार पद्म कहतेहैं और इस पद्मके मूलमें योनिकी स्थितिहै यह पद्म परम प्रकाशमान-व-से-स-तक अर्थात् व-श-ष स-चारवर्ण और चारदल करके शोभितहै ॥ ८८ ॥

मूलं–कुलाभिधं सुवर्णाभं स्वयम्भूलिङ्गसं-
गतम् ॥ द्विरण्डो यत्र सिद्धोस्ति डाकि-
नी यत्र देवता ॥ ८९॥ तत्पद्ममध्यगा यो
निस्तत्र कुण्डलिनी स्थिता॥ तस्य ऊर्ध्वे
स्फुरत्तेजः कामबीजं भ्रमन्मतम् ॥९० ॥
यः करोति सदा ध्यानं मूलाधारे विच-
क्षणः ॥ तस्य स्याद्दार्दुरी सिद्धिर्भूमि-
त्यागक्रमेण वै ॥ ९१ ॥

टीका–वह कमल कुलाभिधहै अर्थात् कुलनामहै और स्वर्णके समान कांतिहै और स्वयंभूलिङ्गसे युक्त है और उस पद्ममें द्विरण्डनामक सिद्ध और डाकिनी देवता अधिष्ठात्रीहै और गणेश देवताहैं ॥ और उस पद्मके मध्यमें योनिहै उस योनिमें कुण्डलिनीकी स्थ-तिहै और उस कुण्डलिनीके ऊपर दीप्तिमान तेजस्व-रूप कामबीज भ्रमण करताहै जो बुद्धिमान् पुरुष इस मूलाधार पद्मका सर्वदा ध्यान करते हैं उनको दार्दुरी वृत्ति सिद्ध होती है और क्रमसें भूमिको त्यागके आ-काशगमन करते हैं ॥ ८९ ॥ ९० ॥ ९१ ॥

मूलं–वपुषः कान्तिरुत्कृष्टा जठराग्निविव-

र्धनं ॥ आरोग्यञ्च पटुत्वञ्च सर्वज्ञत्वञ्च जायते ॥ ९२ ॥

टीका–यह ध्यान करनेसे शरीरमें उत्तम कांति होती है और जठराग्नि वर्धित होताहै और शरीर आरोग्य रहताहै और पटुता और सर्वज्ञता अर्थात् सर्व वस्तुका ज्ञान उत्पन्न होताहै ॥ ९२ ॥

मूलं–भूतं भव्यं भविष्यञ्च वेत्ति सर्वं सकारणम् ॥ अश्रुतान्यपि शास्त्राणि सरहस्यं वदेद्ध्रुवम् ॥ ९३ ॥

टीका–फिर भूत भविष्य वर्तमान तीनोंकाल और सर्व वस्तुके कारणका ज्ञान होताहै और जो शास्त्र कभी श्रवण नहीं कियाहै उसको रहस्य सहित व्याख्या करनेकी शक्ति निश्चय उत्पन्न होती है ॥ ९३ ॥

मूलं–वक्त्रे सरस्वती देवी सदा नृत्यति निर्भरम् ॥ मन्त्रसिद्धिर्भवेत्तस्य जपादेव न संशयः ॥ ९४ ॥

टीका–योगीके मुखमें सर्वदा निरंतर सरस्वती देवी नृत्य करती है और योगीकी जपमात्रसे मन्त्रादिकी सिद्धि होती है इसमें संशय नहीं है ॥ ९४ ॥

मूलं–जरामरणदुःखौघान्नाशयति गुरोर्व-

चः ॥ इदं ध्यानं सदाकार्यं पवनाभ्यासिना परं ॥ ध्यानमात्रेण योगीन्द्रो मुच्यते सर्वाकिल्बिषात् ॥ ९५ ॥

टीका–गुरुका वचन जरा मृत्यु आदि जो दुःखका समूहहै उसको नाश करदेताहै पवनाभ्यासी साधकको यह परमध्यान सर्वदा करनेके योग्यहै ध्यान मात्रसे योगीन्द्र सर्वपापसे मुक्त होजाताहै ॥ ९५ ॥

मूलं–मूलपद्मं यदा ध्यायेत् योगी स्वयम्भुलिङ्गकम् ॥ तदा तत्क्षणमात्रेण पापौघं नाशयेद्ध्रुवम् ॥ ९६ ॥

टीका–योगी जब मूलाधार पद्म स्वयम्भूलिङ्गसंयुक्तका ध्यानकरे तो उसीक्षण निश्चय पापके समूहका नाश करदेगा ॥ ९६ ॥

मूलं–यं यं कामयते चित्ते तं तं फलमवाप्नुयात् ॥ निरन्तरकृताभ्यासात्तं पश्यति विमुक्तिदम् ॥९७॥ बहिरभ्यन्तरे श्रेष्ठं पूजनीयं प्रयत्नतः ॥ ततः श्रेष्ठतमं ह्येतन्नान्यदस्ति मतं मम ॥ ९८ ॥

टीका–जो साधक मूलाधार पद्मका ध्यान करतेहैं वह अपने चित्तमें जोजो वस्तुकी इच्छा करतेहैं सोसो

सर्व वस्तु उनको प्राप्त होतीहैं और सर्वदा यत्नपूर्वक यह अभ्यास करनेसे बाहर भीतर श्रेष्ठपूजनीय मुक्ति-दायी परमात्माको देखतेहैं हेपार्वती इससे श्रेष्ठतम दूसरा योग नहींहै यह हमारा मतहै ॥ ९७ ॥ ९८ ॥

मूलं–आत्मसंस्थं शिवं त्यक्त्वा बहिःस्थं यः समर्चयेत् ॥ हस्तस्थं पिण्डमुत्सृज्य भ्रमते जीविताशया ॥ ९९ ॥

टीका–मनुष्य शरीरस्थ शिवको त्यागके बाहरके देवताको पूजतेहैं जैसे हाथके पिंडको त्यागके जीवके रक्षार्थ अन्य पिंडके हेतु लोग भ्रमण करतेहैं ॥ ९९ ॥

मूलं–आत्मलिंगार्चनं कुर्यादनालस्यं दिने दिने ॥ तस्य स्यात्सकलासिद्धिर्नात्र कार्या विचारणा ॥१०० ॥ निरन्तरकृताभ्यासात्षण्मासे सिद्धिमाप्नुयात् ॥ तस्य वायुप्रवेशोऽपि सुषुम्णायाम्भवेद्ध्रुवम् ॥ ॥ १०१ ॥ मनोजयश्च लभते वायुबिन्दुविधारणाम् ॥ ऐहिकामुष्मिकीसिद्धिर्भवेन्नैवात्र संशयः ॥ १०२ ॥

टीका–जो आलस्यको त्यागके शरीरस्थ परमात्माका नित्य पूजन करेगा उसको सकलसिद्धि प्राप्त-

होंगी इसमें संशय नहीं है यदि इसका अभ्यास निरन्तरकरे तो छःमासमें सिद्धि प्राप्तहोगी और उसके सुषुम्णानाडीमें निश्चय वायु प्रवेश करेगा और मनको जीतलेगा और वायु और बिन्दुका धारण सिद्धहोगा और इसलोक और परलोककी सिद्धि प्राप्त होगी इसमें संशय नहींहै ॥ १०० ॥ १०१ ॥ १०२ ॥

अथ स्वाधिष्ठानचक्रविवरणम् ॥

मूलं–द्वितीयन्तु सरोजञ्च लिंगमूले व्यवस्थितम्॥वादिलान्तं च षड्वर्णं परिभास्वरषड्दलम्॥१०३॥स्वाधिष्ठानाभिधं तत्तु पंकजं शोणरूपकं ॥ बाणाख्यो यत्रसिद्धोऽस्ति देवी यत्रास्ति राकिणी ॥१०४॥

टीका–दूसरा पद्म जो लिङ्गमूलमें स्थितहै वह- बसे लतक- अर्थात्-ब-भ-म-य-र-ल-यह छःवर्णोंकरके युक्तहै और छः दलसे शोभितहै यह रक्तवर्ण पद्मकानाम स्वाधिष्ठानहै और इसस्थानमें बाणनामक सिद्ध और राकिणी देवी अधिष्ठात्रीहैं और ब्रह्मा देवताहैं॥१०३॥१०४॥

मूलं–यो ध्यायति सदा दिव्यं स्वाधिष्ठानारविन्दकम् ॥ तस्य कामाङ्गनाः सर्वा भजन्ते काममोहिताः ॥ १०५ ॥

टीका-जो पुरुष यह दिव्य स्वाधिष्ठानपद्मका सर्वदा ध्यान करते हैं उनको कामरूपिणी स्त्री कामसे मोहित होके भजतीहैं अर्थात् सेवा करतीहैं ॥ १०५॥

मूलं-विविधश्चाश्रुतं शास्त्रं निःशङ्को वै वदेद्ध्रुवम्॥सर्वरोगविनिर्मुक्तो लोके चरति निर्भयः॥ १०६ ॥

टीका-विविधशास्त्र जो कभी श्रवण नहीं किया हो उसकोभी इस पद्मके ध्यानके प्रभावसे निःशंक कहेगा और सर्वरोगसे मुक्तहोके आनन्दपूर्वक संसारमें विचरेगा ॥ १०६ ॥

मूलं-मरणं खाद्यते तेन स केनापि न खाद्यते ॥ तस्य स्यात्परमा सिद्धिरणिमादिगुणप्रदा ॥१०७॥ वायुः सञ्चरते देहे रसवृद्धिर्भवेद्ध्रुवम्॥ आकाशपङ्कजगलत्पीयूषमपि वर्द्धते ॥ १०८॥

टीका-यह साधक मृत्युको नाश करदेताहै और वह किसीसे नष्ट नहींहोता और उस साधकको गुणदेनेवाली अणिमादि सिद्धि प्राप्त होती हैं और उसके शरीरमें वायु संचार करताहै अर्थात् सुषुम्णामें प्रवेश करताहै और निश्चयरसकी वृद्धि होतीहै और सह-

स्त्रदलकमलसे जो अमृत स्त्रवताहै उसकी वृद्धि होती है ॥ १०७ ॥ १०८ ॥

अथ मणिपूरचक्रविवरणम् ॥

मूलं–तृतीयं पङ्कजं नाभौ मणिपूरकसंज्ञकं॥दशारंडादिफान्तार्णं शोभितं हेमवर्णकम् ॥ १०९ ॥ रुद्राख्यो यत्र सिद्धोऽस्ति सर्वमङ्गलदायकः ॥ तत्रस्था लाकिनीनाम्नी देवी परमधार्मिका ॥ ११० ॥

टीका–मणिपूरनामक तीसरापद्म जो नाभिस्थलमेंहै वह हेमवर्ण दशदलकरके शोभितहै और-ड-से फ-तक अर्थात्-ड-ढ-ण-त-थ-द-ध-न-प-फ-यह दशवर्णसे युक्तहै और उस स्थानमें सर्वमंगलदाता रुद्रनामक सिद्ध और लाकिनी देवी अधिष्ठात्री और विष्णुदेवताहैं ॥ १०९ ॥ ११० ॥

मूलं तास्मिन् ध्यानं सदा योगी करोति मणिपूरके ॥ तस्य पातालसिद्धिः स्यान्निरन्तरसुखावहा ॥१११॥ ईप्सितञ्च भवेल्लोके दुःखरोगविनाशनम् ॥ कालस्य वञ्चनञ्चापि परदेहप्रवेशनम् ॥ ११२ ॥

टीका–जो साधक इस मणिपूरचक्रको सर्वदा ध्या-

नकरतेहैं सो सर्वसिद्धिदात्री जो पातालसिद्धि है उसको लाभ करतेहैं और उनका दुःख रोगविनाश होके सकल मनोरथ सिद्ध होताहै और कालको निरादर कर देतेहैं और परदेहमें प्रवेश करनेकी शक्ति उत्पन्न होतीहै ॥ १११ ॥ ११२ ॥

मूलं–जाम्बूनदादिकरणं सिद्धानां दर्शनं भवेत् ॥ ओषधीदर्शनञ्चापि निधीनां दर्शनं भवेत् ॥ ११३ ॥

टीका–यह साधककों स्वर्णआदि रचना करनेकी शक्ति होतीहै और देवतोंका दर्शन और निधि और ओषधीका दर्शन होताहै ॥ ११३ ॥

मूलं–हृदयेऽनाहतंनाम चतुर्थं पङ्कजं भवेत् ॥११४॥ कादिठान्तार्णसंस्थानं द्वादशारसमन्वितम् ॥ अतिशोणं वायुबीजं प्रसादस्थानमीरितम् ॥ ११५ ॥

टीका–हृदयस्थानमें जो अनाहतनामक चतुर्थपद्महै वह-क-से-ठ-तक अर्थात् क-ख-ग-घ-ङ-च-छ-ज-झ-ञ-ट-ठ-यह बारह वर्ण और बारहदलसे युक्तहै और अति उज्ज्वल रक्तवर्णसे शोभायमानहै और

वह प्रसन्नस्थान वायुका बीज अर्थात् प्राणवायुका आधारहै ॥ ११४ ॥ ११५ ॥

मूलं-पद्मस्थं तत्परं तेजो बाणलिंगं प्रकीर्तितम्॥ यस्य स्मरणमात्रेण दृष्टादृष्टफलं लभेत् ॥ ११६ ॥

टीका-उस हृदयकमलमें जो परमतेजहै उसीको बाणलिङ्ग कहतेहैं जिसके ध्यानमात्रसे साधक इस लोक और परलोकका उत्तम फल आनंदपूर्वक लाभ करतेहैं ॥ ११६ ॥

मूलं-सिद्धः पिनाकी यत्रास्ते काकिनी यत्र देवता ॥ एतस्मिन् सततं ध्यानं हृत्पाथोजे करोति यः ॥ क्षुभ्यन्ते तस्य कान्ता वै कामार्ता दिव्ययोषितः ॥११७॥

टीका-जिस पद्ममें पिनाकी सिद्ध और काकिनी देवी अधिष्ठात्री हैं उस हृदयस्थ पद्ममें जो साधक सर्वदा ध्यान करताहै उसके समीप कामार्ता सुन्दर स्त्री अप्सरा आदि मोहित होजाती हैं ॥ ११७ ॥

मूलं-ज्ञानञ्चाप्रतिमंतस्य त्रिकालविषयम्भवेत् ॥ दूरश्रुतिर्दूरदृष्टिः स्वेच्छया खगतां व्रजेत् ॥ ११८ ॥

टीका–उस साधकको अपूर्वज्ञान उत्पन्न होताहै और त्रिकाल दर्शी होताहै और दूरशब्द श्रवण करने और दूरकी सूक्ष्मवस्तु देखनेकी शक्ति उत्पन्न होती है और स्वेच्छासे आकाशमें गमन करताहै ॥ ११८ ॥

मूलं–सिद्धानां दर्शनश्चापि योगिनीदर्शनं तथा ॥ भवेत् खेचरसिद्धिश्च खेचराणां जयन्तथा॥११९॥यो ध्यायति परं नित्यं बाणलिंगं द्वितीयकम् ॥ खेचरीभूचरी सिद्धिर्भवेत्तस्य न संशयः ॥ १२० ॥

टीका–जो साधक यह दूसरे परमबाणलिङ्गका नित्य ध्यान करताहै उसकों देवता और योगनीका दर्शन होताहै और आकाशमें गमन करनेकी शक्ति हो जाती है और आकाशगामीसे जय प्राप्त होतीहै और खेचरी भूचरी सिद्ध होती है इसमें संशय नहीं है॥११९॥१२०॥

मूलं–एतद्ध्यानस्य माहात्म्यं कथितुं नैव शक्यते ॥ ब्रह्माद्याः सकला देवा गोपायन्ति परन्त्विदम् ॥ १२१ ॥

टीका–हे देवी इस अनाहत पद्मके ध्यानके माहात्म्य को कोई नहीं कहसकता और इस ध्यानको ब्रह्मा आदि सकल देवता गोप्य रखतेहैं ॥ १२१ ॥

अथ विशुद्धचक्रविवरणम् ॥

मूलं—कण्ठस्थानस्थितं पद्मं विशुद्धं नाम-पञ्चमम् ॥१२२॥ सुहेमाभं स्वरोपेतं षोड-शस्वरसंयुतम् ॥ छगलाण्डोऽस्ति सिद्धो-त्रशाकिनी चाधिदेवता ॥ १२३ ॥

टीका—कंठस्थानमें जो पांचवां विशुद्धनामक कमलहै वह स्वर्णके समान कांतिसे शोभितहै और सोलह स्वर अर्थात् अ-आ-इ-ई-उ-ऊ-ऋ-ॠ-ऌ-ॡ-ए-ऐ-ओ-औ-अं-अःसे युक्तहै और छगलांड सिद्ध और शाकिनीदेवी अधिष्ठात्री और जीवात्मा देवता इसस्थान में सदा विराजमान है ॥ १२२ ॥ १२३ ॥

मूलं—ध्यानं करोति यो नित्यं सयोगीश्वर-पण्डितः ॥ किन्त्वस्य योगिनोऽन्यत्र वि-शुद्धाख्ये सरोरुहे ॥ चतुर्वेदा विभासन्ते सरहस्या निधेरिव ॥ १२४॥

टीका—जो पुरुष इस विशुद्धपद्मका नित्य ध्यान करतेहैं सो योगीश्वर पंडितहैं और इस विशुद्धपद्ममें उस पुरुषको चारोवेद रहस्यसहित समुद्रके रत्नवत् प्रकाश होताहै ॥ १२४ ॥

मूलं—इहस्थाने स्थितो योगी यदा क्रोध-

वशो भवेत्॥तदा समस्तं त्रैलोक्यं कम्पते नात्र संशयः॥ १२५॥

टीका-यह विशुद्धपद्ममें जब योगी मन और प्राणको स्थित करके यदि क्रोध करे तो अवश्य चराचर त्रैलोक्य कम्पायमान होजाय इसमें सन्देह नहीं॥१२५॥

मूलं-इहस्थाने मनो यस्य दैवात् याति लयं यदा॥ तदा बाह्यं परित्यज्य स्वान्तरे रमते ध्रुवम्॥ १२६॥

टीका-यह कमलमें साधकका मन दैवात् जब लय होताहै तब सकलबाह्य विषयको त्यागके योगीका मन और प्राण शरीरके अंतरहीमें निश्चय रमण करताहै॥ १२६॥

मूलं-तस्य न क्षतिमायाति स्वशरीरस्य शक्तितः॥ संवत्सरसहस्रेऽपि वज्रातिकठिनस्यवै॥ १२७॥यदा त्यजति तद्ध्यानं योगींद्रोऽवनिमण्डले॥तदा वर्षसहस्राणि मन्यते तत्क्षणंकृती॥ १२८॥

टीका-उस योगीका शरीर वज्रसेभी कठोर होजाताहै और उसको स्वशरीरकी शक्तिसे किसीप्रकारकी हानि नहीं होतीहै और सहस्रवर्ष समाधिके पीछे जब

उस ध्यानको छोडके योगीकी चित्तवृत्ति संसारमें आवेगी तब उस सहस्रवर्षको योगी एकक्षण व्यतीत भया मानेगा ॥ १२७ ॥ १२८ ॥

अथ आज्ञाचक्रविवरणम् ॥

मूलं–आज्ञापद्मं भ्रुवोर्मध्ये हक्षोपेतं द्विपत्रकं॥शुक्लाभं तन्महाकालः सिद्धो देव्यत्रहाकिनी ॥ १२९ ॥

टीका–भ्रूके मध्यमें जो आज्ञापद्महै उसमे हं-क्षं-दो बीजहैं और सुंदर श्वेतवर्ण दो पत्रहैं और उसस्थानमें महाकाल सिद्धहै और हाकिनीदेवी अधिष्ठात्री और परमात्मा देवताहै ॥ १२९ ॥

मूलं–शरच्चंद्रनिभं तत्राक्षरबीजं विजृंभितं॥ पुमान्न परमहंसोऽयं यज्ज्ञात्वा नावसीदति ॥ १३० ॥ तत्र देवः परन्तेजः सर्वतन्त्रेषु मन्त्रिणः॥चिन्तयित्वा परां सिद्धिं लभते नात्र संशयः ॥ १३१ ॥

टीका–उस आज्ञापद्मके मध्यमें शरदच्चंद्रके समान परमतेज चंद्रबीज अर्थात्. ठं. बीज विराजमानहै इसके ज्ञान होनेसे परमहंस पुरुषको कभी कष्ट नहीं होता यह परमतेजका प्रकाश सर्वतंत्रोंकरके गो-

पितहै इसके चिंतनमात्रसे अवश्य परम सिद्धिलाभ होतीहै ॥ १३० ॥ १३१ ॥

मूलं–तुरीयं त्रितयं लिंगं तदाहं मुक्तिदायकः ॥ ध्यानमात्रेण योगीन्द्रो मत्समो भवति ध्रुवम् ॥ १३२ ॥

टीका–हेपार्वती उसस्थानमें तुरीया तृतीयलिंग हमीं मुक्तिके दाताहैं इसके ध्यानमात्रसे योगीन्द्र निश्चय हमारे तुल्य होजायगा ॥ १३२ ॥

मूलं–इडा हि पिंगला ख्याता वरणासीति होच्यते ॥ वाराणसी तयोर्मध्ये विश्वनाथोत्र भाषितः ॥ १३३ ॥

टीका–यह शरीरमें जो दो इडा और पिंगला नाडीहैं उनको वरणा और असी कहतेहैं यह वरणा और असीके मध्यमें स्वयं विश्वनाथजी विराजमानहैं तात्पर्य यहहै कि यह इडा और पिंगलाके मध्यमें जो स्थानहै उसीको शिवजीनें वाराणसी कहाहै ॥ १३३ ॥

मूलं–एतत् क्षेत्रस्य माहात्म्यमृषिभिस्तत्त्वदर्शिभिः ॥ शास्त्रेषु बहुधा प्रोक्तं परं तत्त्वं सुभाषितम् ॥ १३४ ॥

टीका–यह वाराणसी क्षेत्रके माहात्म्यको तत्वद-

र्षी ऋषिलोगोंने अनेक शास्त्रोंमें बहुत प्रकारसे परम-
तत्व कहाहै ॥ १३४ ॥

मूलं—सुषुम्णा मेरुणा याता ब्रह्मरन्ध्रं य-
तोऽस्ति वै ॥ ततश्चैषा परावृत्या तदाज्ञा-
पद्मदक्षिणे ॥ १३५ ॥ वामनासापुटं या-
ति गंगेति परिगीयते ॥ १३६ ॥

टीका—सुषुम्णानाडी मेरुदंडद्वारा जहां ब्रह्मरन्ध्रहै
उस स्थानमें गईहै और इडानाडी सुषुम्णाके अपर
आवृतसे आज्ञाचक्रके दक्षिणभाग होके वामनासापु-
टको गईहै इसको गङ्गा कहतेहैं ॥१३५॥ १३६ ॥

मूलं—ब्रह्मरन्ध्रेहि यत् पद्मं सहस्रारं व्यव-
स्थितं ॥ तत्र कन्देहि या योनिस्तस्यां च-
न्द्रो व्यवस्थितः ॥ १३७ ॥ त्रिकोणाकार-
तस्तस्याः सुधाक्षरति सन्ततम् ॥ इडाया-
ममृतं तत्र समं स्रवति चन्द्रमाः ॥ १३८ ॥
अमृतं वहति द्वारा धारारूपं निरन्तरम् ॥
वामनासापुटं याति गंगेत्युक्ता हि यो-
गिभिः ॥ १३९ ॥

टीका—ब्रह्मरन्ध्रमें जो सहस्रदल पद्महै उस पद्मके
कन्दमें योनिहै उस योनिमें चन्द्रमा विराजमानहैं

और वही त्रिकोणाकार योनिसे चन्द्र विगलित अमृत सर्वदा स्रवताहै सो अमृत चंद्रमासे इडानाडीद्वारा समभावसे निरन्तर धारारूप गमन करताहै और उस इडानाडीकी गति वामनासापुटमेंहै इसहेतुसे योगीलोग इस नाडीको गंगा कहतेहैं॥१३७॥१३८॥१३९॥

मूलं–आज्ञापङ्कजदक्षांसाद्वामनासापुटंगता ॥ उदग्वहेति तत्रेडा गंगेति समुदाहृता ॥ १४० ॥

टीका–वह इडानाडी आज्ञापद्मके दक्षिण भागसे वामनासापुटको गमन करतीहै इसीको उदग्वाहिनी गंगा कहतेहैं ॥ १४० ॥

मूलं–ततो द्वयहिमस्थाने वाराणस्यान्तु चिन्तयेत् ॥ तदाकारापिंगलापि तदाज्ञाकमलोत्तरे ॥ दक्षनासापुटे याति प्रोक्तास्माभिरसीति वै ॥ १४१ ॥

टीका–यह इडा और पिङ्गलाके मध्य स्थानको वाराणसी चिन्तनाकरे और इडानाडीके समान पिङ्गलाभी उस आज्ञाकमलके वामभागसे दक्ष नासापुटको गईहै इसहेतुसे हेदेवी इस पिङ्गलाको हमने असी कहाहै ॥ १४१ ॥

मूलं—मूलाधारेहि यत् पद्मं चतुष्पत्रं व्यवस्थितं ॥ तत्र कन्देस्तियायोनिस्तस्यां सूर्यो व्यवस्थितः ॥ १४२ ॥

टीका—जोमूलाधारपद्म चार दलसे युक्तहै उस कमल के कन्दमें जो योनिहै इस योनिमें सूर्य स्थितहैं ॥ १४२ ॥

मूलं—तत् सूर्यमण्डलाद्वारं विषं क्षरति सन्ततम् ॥ १४३ ॥ पिंगलायां विषं तत्र समर्पयति तापनः ॥ विषं तत्र वहन्ती या धारारूपं निरन्तरम् ॥ दक्षनासापुटे याति कल्पितेयन्तु पूर्ववत् ॥ १४४ ॥

टीका—वही सूर्यमण्डलसे निरन्तर विष स्रवताहै और पिङ्गलाद्वारा गमन करताहै और वह विष सर्वदा धारारूप पिङ्गलानाडीसे प्रवाहित रहताहै और यह पिङ्गलानाडी दक्षिणनासापुटमें गईहै ॥ १४३ ॥ १४४ ॥

मूलं—आज्ञापङ्कजवामास्याद्दक्षनासापुटं गता ॥ उदग्वहापिंगलापि पुरासीति प्रकीर्तिता ॥ १४५ ॥

टीका—यह नाडी आज्ञाकमलके वामभागसे दक्षिण नासिकापुटको गई है इस हेतुसे यह पिङ्गलानाडीको असी कहते हैं ॥ १४५ ॥

मूलं-आज्ञापद्ममिदं प्रोक्तं यत्र देवो महेश्वरः ॥ १४६ ॥ पीठत्रयं ततश्चोर्ध्वं निरुक्तं योगचिन्तकैः ॥ तद्बिन्दुनादशक्त्याख्यं भालपद्मे व्यवस्थितम् ॥ १४७ ॥

टीका-इस स्थानमें महेश्वर देवताहैं इसको आज्ञापद्म कहते हैं और योगचिन्तक लोग कहते हैं कि इस पद्मके ऊपर पीठत्रयकी स्थितिहै अर्थात् नादबिंदु, शक्ति, यह तीनों इस भालपद्ममें विराजमान हैं ॥ १४६ ॥ १४७ ॥

मूलं-यः करोति सदाध्यानमाज्ञापद्मस्य गोपितम् ॥ पूर्वजन्मकृतं कर्म विनश्येदविरोधतः ॥ ४८ ॥

टीका-जो पुरुष सर्वदा गोपित करके इस आज्ञाकमलका ध्यान करतेहैं उनका पूर्वजन्मकृत कर्मफल सकल निर्विघ्न नाश होजाताहै ॥ १४८ ॥

मूलं-इह स्थितः सदा योगी ध्यानं कुर्यान्निरन्तरं ॥ तदा करोति प्रतिमां प्रतिजापमनर्थवत् ॥ १४९ ॥

टीका-जब योगी यह ध्यान सर्वदा निरन्तर करे

तो उसका प्रतिमा पूजन करना वा जप करना सर्वथा अनर्थवत्‌है ॥ १४९ ॥

मूलं-यक्षराक्षसगन्धर्वा अप्सरोगणाकिन्नराः ॥ सेवन्ते चरणौ तस्य सर्वे तस्य वशानुगाः ॥ १५० ॥

टीका-यक्ष और राक्षस और गन्धर्व और अप्सरा और किन्नर आदि सब इस ध्यानयुक्त योगीके वशमें हो जातेहैं और उसके चरणकी सेवा करते हैं॥१५०॥

मूलं-करोति रसनां योगी प्रविष्टां विपरीतगाम्॥ लम्बिकोर्ध्वेषु गर्तेषु धृत्वा ध्यानं भयापहम् ॥ १५१ ॥ अस्मिन् स्थाने मनो यस्य क्षणार्धं वर्ततेऽचलम्॥तस्य सर्वाणि पापानि संक्षयं यान्ति तत्क्षणात् ॥ १५२ ॥

टीका-जो योगी विपरीतगामी जिह्वाको ऊपर तालुमूलमें प्रवेश करके यह भयनाशक आज्ञाकमल का ध्यान अर्धक्षणभी मन अचल स्थिरता पूर्वक करते है उनका सकल पातक उसीक्षण नाश होजाताहै॥ १५१॥१५२॥

मूल-यानि यानिहि प्रोक्तानि पंचपद्मे फ-

लानि वै ॥ तानि सर्वाणि सुतरामेतज्ज्ञा-
नाद्भवन्ति हि ॥ १५३ ॥

टीका–पंच पद्मका जो जो फल पहिले कहाहै सो सबका समस्त फल आपही इस आज्ञाकमलके ध्यान-सेही प्राप्त होजायगा ॥ १५३ ॥

मूलं–यः करोति सदाभ्यासमाज्ञापद्मे वि-
चक्षणः ॥ वासनाया महाबन्धं तिरस्कृ-
त्य प्रमोदते ॥ १५४ ॥

टीका–जो बुद्धिमान् सर्वदा मन स्थिर करके यह आज्ञापद्मका अभ्यास करते हैं वह वासनारूपी महा-बन्धको निरादर करके आनन्द लाभ करते हैं॥ १५४॥

मूलं–प्राणप्रयाणसमये तत्पद्मं यः स्मर-
न्सुधीः ॥ त्यजेत्प्राणं स धर्मात्मा परमा-
त्मनि लीयते ॥ १५५ ॥

टीका–जो बुद्धिमान् मृत्युके समय उस आज्ञापद्म का ध्यान करेगा सो धर्मात्मा प्राणको त्यागके परमा-त्मामें लय होजायगा ॥ १५५ ॥

मूलं–तिष्ठन् गच्छन् स्वपन् जाग्रत् यो-
ध्यानं कुरुते नरः ॥ पापकर्म विकुर्वाणो
नहि मज्जति किल्बिषे ॥ १५६ ॥

टीका-जो मनुष्य बैठे चलते जाग्रतमें स्वप्नमें सर्वदा इस कमलका ध्यान करते हैं सो यदि पापकर्म रतभी हों तोभी मोक्षको प्राप्त होते हैं ॥ १५६ ॥

मूलं-राजयोगाधिकारी स्यादेतच्चिन्तनतो ध्रुवम् ॥ योगी बन्धाद्विनिर्मुक्तः स्वीयया प्रभया स्वयम् ॥ १५७॥ द्विदलध्यानमाहात्म्यं कथितुं नैव शक्यते ॥ ब्रह्मादिदेवताश्चैव किञ्चिन्मत्तो विदन्ति ते॥१५८॥

टीका-जो इस कमलका ध्यान करताहै वह निश्चय राजयोगका अधिकारी है योगी स्वयं अपने प्रभासे सकलबन्धसे मुक्त होजाताहै हे देवी इस द्विदल पद्मके माहात्म्यको कोई कहनेमें समर्थ नहीं है ब्रह्मा आदि देवता इस पद्मके माहात्म्यको किञ्चित् हमारे द्वारा जानते हैं ॥ १५७ ॥ १५८ ॥

मूलं-अतऊर्ध्वं तालुमूले सहस्रारं सरोरुहम् ॥ अस्ति यत्र सुषुम्णायामूलं सविवरं स्थितम् ॥ १५९ ॥

टीका-इस आज्ञापद्मके ऊपर तालुमूलमें सहस्रदल कमल शोभायमानहै उसी स्थानमें ब्रह्मरन्ध्रके विवरमूलमें सुषुम्णा स्थितहै ॥ १५९ ॥

मूलं-तालुमूले सुषुम्णास्य अधोवक्रा प्रव-
र्त्तते ॥ मूलाधारेण योन्यस्ताः सर्वनाड्यः
समाश्रिताः ॥ ता बीजभूतास्तत्त्वस्य ब्र-
ह्ममार्गप्रदायिकाः ॥ १६० ॥

टीका-वह सुषुम्णाका मुख तालुमूल अर्थात् ब्र-
ह्मरन्ध्रमें नीचेको वर्तमानहै और मूलाधारसे योनि
पर्यंत जो सकल नाडीहैं वह इस तत्वज्ञानबीजस्वरूप
ब्रह्ममार्गकी दाता सुषुम्णाके अधोवदनके अवलम्बसे
स्थितहैं ॥ १६० ॥

मूलं-तालुस्थाने च यत्पद्मं सहस्रारं पुरो-
दितम् ॥ तत्कन्दे योनिरेकास्ति पश्चिमा-
भिमुखी मता ॥ १६१ ॥ तस्य मध्ये सुषु-
म्णाया मूलं सविवरं स्थितम् ॥ ब्रह्मरन्ध्रं
तदेवोक्तमामूलाधारपङ्कजम् ॥ १६२ ॥

टीका-तालुस्थानमें जो सहस्र दलकमल कहाग-
याहै उसके कन्दमें एक योनि पश्चिमाभिमुखीहै अर्थात्
पीछेको मुखहै उस योनिके मध्यमें जो मूलविवरहै उसमें
सुषुम्णा ज्ञाननाडी स्थितहै हेदेवी इसको ब्रह्मरन्ध्र और
इसीको मूलाधारपद्मभी कहतेहैं ॥ १६१ ॥ १६२ ॥

मूलं-तत्रांतरन्ध्रेचिच्छक्तिः सुषुम्णा कु-

ण्डली सदा ॥ १६३ ॥ सुषुम्णायां स्थिता-नाडी चित्रास्यान्मम वल्लभे ॥ तस्यां मम मते कार्या ब्रह्मरन्ध्रादिकल्पना ॥१६४॥

टीका-यह सुषुम्णानाडीके रन्ध्रमें कुण्डलनी शक्ति सर्वदा विराजमानहै वह सुषुम्णा अन्तरगताशक्तिको चित्रानाडी कहतेहैं हेप्रिये पार्वती हमारे मतमें इसी चित्रासें ब्रह्मरन्ध्र आदि कलपना भईहै॥१६३॥१६४॥

मूलं-यस्याः स्मरणमात्रेण ब्रह्मज्ञत्वं प्रजायते ॥ पापक्षयश्च भवति न भूयः पुरुषो भवेत् ॥ १६५ ॥

टीका-यह चित्रानाडीके ध्यानमात्रसे ब्रह्मज्ञान उत्पन्नहोताहै और पाप क्षय होजाताहै और फिर संसाररूपी बन्धमें योगी नहीं पडता अर्थात् मोक्ष होजाताहै ॥ १६५ ॥

मूलं-प्रवेशितं चलाङ्गुष्ठं मुखे स्वस्य निवेशयेत्॥ तेनात्र न वहत्येव देहचारी समीरणः ॥ १६६ ॥

टीका-दक्षिण हाथके अङ्गुष्ठको मुखमें प्रवेश करके मुखको बन्द करलेनेसे देहचारी जो प्राणवायुहै वह निश्चय स्थिर होजाताहै ॥ १६६ ॥

मूलं–तेन संसारचक्रेस्मिन्न भ्रमन्ते च सर्वदा॥ तदर्थं ये प्रवर्तन्ते योगिनः प्राणधारणे ॥१६७॥ ततएवाखिलानाडी निरुद्धाचाष्टवेष्टनम्॥इयं कुण्डलिनी शक्तीरन्ध्रं त्यजति नान्यथा ॥ १६८ ॥

टीका–यह प्राणवायुके स्थिर होजानेसे इस संसार चक्रमें सर्वदा भ्रमण करना छूटजाताहै अर्थात् मोक्ष होजाताहै इसहेतुसे योगी प्राणवायुके धारण करनेमें प्रवृत्त होतेहैं और इसधारणसे सकलनाडी जो मल और काम क्रोधादि आठप्रकारसे बन्धनमें हैं वह खुल जातीहैं तब यह कुण्डलनीशक्ति ब्रह्मरन्ध्रको निश्चय त्याग देतीहै इसके त्यागदेनेसे जीव ब्रह्मका सम्बन्ध होजाताहै ॥ १६७ ॥ १६८ ॥

मूलं–यदा पूर्णासु नाडीषु सन्निरुद्धानिलास्तदा ॥ बन्धत्यागेन कुण्डल्या मुखं रन्ध्राद्बहिर्भवेत्॥ सुषुम्णायां सदैवायं वहेत्प्राणसमीरणः ॥ १६९ ॥

टीका–जब वायु निरोधहोके सकल नाडीमें पूर्ण हो जायगा तब कुण्डलनी अपने बन्धको त्यागके ब्रह्म रन्ध्रके मुखको त्यागदेगी तब प्राणवायुके

प्रवाह सदैव सुषुम्णामें होजायगा ॥ १६९ ॥

मूलं–मूलपद्मास्थितायोनिर्वामदक्षिणकोणतः ॥ इडापिंगलयोर्मध्ये सुषुम्णा योनिमध्यगा ॥ १७० ॥ ब्रह्मरन्ध्रन्तु तत्रैव सुषुम्णा धारमण्डले ॥ यो जानाति स मुक्तः स्यात्कर्मबन्धाद्विचक्षणः ॥ १७१ ॥

टीका–मूलाधारपद्मस्थित जो योनिहै उस योनिके वाम दक्षिण भागमें इडा और पिंगला नाडी स्थित है और दोनो नाडीके बीचमें अर्थात् योनिके मध्यमें सुषुम्णा की स्थिति है उसी सुषुम्णाके आधारमंडलमें अर्थात् उसके मध्यमें ब्रह्मरन्ध्र है जो इसको जानताहै सो बुद्धिमान् कर्मबन्धसे मुक्तहै ॥ १७० ॥ १७१ ॥

मूलं–ब्रह्मरन्ध्रमुखे तासां संगमः स्यादसंशयः ॥ तस्मिन्स्नाने स्नातकानां मुक्तिः स्यादविरोधतः ॥१७२॥

टीका–ब्रह्मरंध्रके मुखमें इन तीनों नाडीका निश्चय सम्बन्धहै इसमें स्नान करनेसे ज्ञानीलोगोंको मुक्ति लाभहोगी ॥ १७२ ॥

मूलं–गंगायमुनयोर्मध्ये वहत्येषा सरस्वती ॥ तासान्तु संगमे स्नात्वा धन्यो याति परां गतिम् ॥ १७३ ॥

टीका–गंगा यमुनाके मध्यमें सरस्वतीका प्रवाह है यह त्रिवेणी संगममें स्नान करनेसे मनुष्य परमगतिको प्राप्त होताहै ॥ १७३ ॥

मूलं–इडा गंगा पुरा प्रोक्ता पिंगलाचार्कपुत्रिका ॥ मध्या सरस्वती प्रोक्ता तासां संगोऽतिदुर्लभः ॥ १७४ ॥

टीका–इडा गंगाहै और पिंगला यमुनाहै और मध्यमें सुषुम्णा सरस्वती है यह त्रिवेणी संगम कहा गयाहै इसका स्नान अति दुर्लभहै ॥ १७४ ॥

मूलं–सितासिते संगमे यो मनसा स्नानमाचरेत् ॥ सर्वपापविनिर्मुक्तो याति ब्रह्मसनातनम् ॥ १७५ ॥

टीका–यह इडा और पिंगलाके संगममें मानसिक स्नान करनेसे साधक सर्व पापसे मुक्त होके सनातन ब्रह्ममें लय होजाताहै ॥ १७५ ॥

मूलं–त्रिवेण्यां संगमे यो वै पितृकर्म समाचरेत् ॥ तारयित्वा पितॄन्सर्वान्स याति परमां गतिम् ॥ १७६ ॥

टीका–जो पुरुष इस त्रिवेणी संगममें पितृकर्मका

अनुष्ठान करतेहैं वह सर्व पितृकुलको तारके परम गतिको लाभ करते हैं ॥ १७६ ॥

मूलं-नित्यं नैमित्तिकं काम्यं प्रत्यहं यः समाचरेत्॥मनसा चिन्तयित्वा तु सोऽक्षयं फलमाप्नुयात् ॥ १७७ ॥

टीका-उसी संगमस्थानमें जो साधक नित्य और नैमित्तिक और काम्य कर्मका अनुष्ठान सर्वदा मनसे चिन्तनपूर्वक करते हैं सो अक्षय फललाभ करतेहै १७७

मूलं-सकृद्यः कुरुते स्नानं स्वर्गे सौख्यं भुनक्ति सः॥ दग्ध्वा पापानशेषान्वै योगी शुद्धमतिः स्वयम् ॥१७८॥अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा ॥ स्नानाचरणमात्रेण पूतो भवति नान्यथा ॥ १७९ ॥

टीका-जो पवित्रमति योगी एकवार इस संगममें स्नान करते हैं वह सर्व पापको दग्धकरके स्वर्गका दिव्य भोग भोगते हैं और यह साधक पवित्र हो वा अपवित्र हो वा किसी अवस्थामें हो यह संगमके ध्यानरूपी स्नानमात्रसे निश्चय पवित्र होजायगा ॥१७८॥१७९॥

मूलं-मृत्युकाले प्लुतं देहं त्रिवेण्याः सलिले

यदा ॥ विचिन्त्य यस्त्यजेत्प्राणान्स तदा मोक्षमाप्नुयात् ॥ १८० ॥

टीका—मृत्युके समयमें साधक जो यह चिंतन करे कि हमारा शरीर त्रिवेणीके सलिलमें मग्नहै तो उसी क्षण प्राणको त्यागके मोक्षगतिको प्राप्तहोगा ॥ १८० ॥

मूलं—नातः परतरं गुह्यं त्रिषु लोकेषु विद्यते ॥ गोप्तव्यं तत्प्रयत्नेन न व्याख्येयं कदाचन ॥ १८१ ॥

टीका—इस तीर्थसे परे त्रिभुवनमें दूसरा गुप्त तीर्थ नहीं है इसको यत्नसे गोपित रखना उचितहै यह कदापि प्रकाश करनेके योग्य नहीं हैं ॥ १८१ ॥

मूलं—ब्रह्मरन्ध्रे मनोदत्त्वा क्षणार्धं यदि तिष्ठति ॥ सर्वपापविनिर्मुक्तः सयाति परमां गतिम् ॥ १८२ ॥

टीका—ब्रह्मरन्ध्रमें मनदेकरके यदि क्षणार्धभी स्थिर रक्खे तो सर्व पापसे मुक्तहोके साधक परम गतिको अर्थात् मोक्षको प्राप्त होजाय ॥ १८२ ॥

मूलं—अस्मिन् लीनं मनो यस्य सयोगीमयि लीयते ॥ अणिमादिगुणान् भुक्त्वा स्वेच्छया पुरुषोत्तमः ॥ १८३ ॥

टीका—हे पार्वती इस ब्रह्मरन्ध्रमें जिसका मन लीन होय सो पुरुषोत्तमयोगी अणिमादि गुणोंको भोगके इच्छापूर्वक हमारेमें लय होजायगा ॥ १८३ ॥

मूलं—एतद्रन्ध्रध्यानमात्रेण मर्त्यः संसारेऽस्मिन् वल्लभो मे भवेत्सः ॥ पापान् जित्वा मुक्तिमार्गाधिकारी ज्ञानं दत्त्वा तारयत्यद्भुतं वै ॥ १८४ ॥

टीका—हे देवी इस ब्रह्मरन्ध्रके ध्यानमात्रसे यह संसारमें प्राणी हमको प्रिय होजाताहै और पापराशिको जीतके यह साधक मुक्तिमार्गका अधिकारी हो जाता है और अनेक मनुष्योंको ज्ञान उपदेश करके संसारसे परित्राण करदेताहै ॥ १८४ ॥

मूलं—चतुर्मुखादित्रिदशैरगम्यं योगिवल्लभम् ॥ प्रयत्नेन सुगोप्यं तद्ब्रह्मरन्ध्रं मयोदितम् ॥ १८५ ॥

टीका—हे देवी यह ब्रह्मरन्धका ध्यान जो हमनें कहा है इसको यत्न करके गोपित रखना उचित है यह ज्ञान योगीलोगोंको अति प्रियहै इसका मार्ग ब्रह्मा आदि देवताकोभी अगम्यहै ॥ १८५ ॥

मूलं—पुरा मयोक्ता या योनिः सहस्रारे स-

रोरुहे ॥ तस्याऽधो वर्तते चन्द्रस्तद्ध्यानं क्रियते बुधैः ॥ १८६ ॥

टीका—हे देवी पहिले जो सहस्रदलकमलके मध्यमें योनिमण्डल हमने कहाहै उस योनिके अधोभागमें चन्द्रमा स्थितहैं यह चन्द्रमण्डलका बुद्धिमान् लोग सर्वदा ध्यान करतेहैं ॥ १८६ ॥

मूलं—यस्य स्मरणमात्रेण योगीन्द्रोऽवनि-मण्डले ॥ पूज्यो भवति देवानां सिद्धानां सम्मतो भवेत् ॥ १८७ ॥

टीका—इस चन्द्रमण्डलके ध्यानमात्रसे योगीन्द्र संसारमें पूजनीय होजाताहै और देवता और सिद्ध-लोगोंके तुल्य होजाताहै ॥ १८७ ॥

मूलं—शिरः कपालविवरे ध्यायेद्दुग्धमहो-दधिम् ॥ तत्र स्थित्वा सहस्रारे पद्मे चन्द्रं विचिन्तयेत् ॥ १८८ ॥

टीका—शिरस्थित जो कपालविवरहै उसमें क्षीर समुद्रका ध्यानकरे उसी स्थानमें स्थितिपूर्वक सहस्र दलकमलमें चन्द्रमाका चिन्तनकरे ॥ १८८ ॥

मूलं—शिरः कपालविवरे द्विरष्टकलयायु-तः ॥ पीयूषभानुहंसाख्यं भावयेत्तं निरं-

जनम् ॥ १८९ ॥ निरन्तरकृताभ्यासात्त्रि-
दिने पश्यति ध्रुवम् ॥ दृष्टिमात्रेण पापौघं
दहत्येव स साधकः ॥ १९० ॥

टीका—वह शिरस्थितकपालविवरमें सोलहकला संयु-
क्त अमृतकीर्णसेयुक्त हंससंज्ञक निरंजनका चिन्तनकरे
निरन्तर तीनदिन यह अभ्यास करनेसे निरञ्जनका सा-
क्षात् साधकको अवश्य प्रकाशहोगा सो साधक दृष्टिमा-
त्रसे सर्वपातकको दहनकरडालेगा ॥ १८९ ॥ १९० ॥

मूलं—अनागतञ्च स्फुरति चित्तशुद्धिर्भवे-
त्खलु ॥ सद्यः कृत्वापि दहति महापात-
कपञ्चकम् ॥ १९१ ॥

टीका—यह ध्यान करनेसे अनागत विषयकी स्फू-
र्ति होगी अर्थात् जो विषय कभी उत्पन्न नहीं भयाहै
उसकी स्फूर्तिहोगी और चित्तकी शुद्धिहोगी और सा-
धक ध्यानमात्रसे उसी क्षण पञ्चमहापातक दहन कर-
डालेगा ॥ १९१ ॥

मूलं—आनुकूल्यं ग्रहा यान्ति सर्वे नश्य-
न्त्युपद्रवाः ॥ उपसर्गाः शमं यान्ति युद्धे
जयमवाप्नुयात् ॥ १९२ ॥ खेचरीभूचरी
सिद्धिर्भवेच्छीरेन्दुदर्शनात् ॥ ध्यानादे-

वभवेत्सर्वं नात्र कार्या विचारणा॥ १९३॥ सन्तताभ्यासयोगेन सिद्धो भवति मानवः॥ सत्यं सत्यं पुनः सत्यं मम तुल्यो भवेद्ध्रुवम् ॥ योगशास्त्रं च परमं योगिनां सिद्धिदायकम् ॥ १९४॥

टीका–शिरस्थचन्द्रमाका ध्यान करनेसे सर्व ग्रह अनुकूल होजातेहैं और समस्त उपद्रवका नाश होजाताहै और उपसर्ग प्रशमित होतेहैं और युद्धमें जय लाभ होताहैं और खेचरी भूचरीकी सिद्धि प्राप्त होतीहै इसमें सन्देह नहींहै और निरन्तर यह योग अभ्यास करनेसे अवश्यसाधक सिद्ध होजाताहै हेपार्वती हम सत्य सत्य वारम्वार कहतहै कि हमारे तुल्य होजायगा इसमें सन्देह नहींहै यह परमयोग योगी लोगोंके सिद्धिकादाताहै ॥ १९२ ॥ १९३ ॥ १९४ ॥

अथ राजयोगकथनम् ॥

मूलं–अत ऊर्ध्वं दिव्यरूपं सहस्रारं सरोरुहम् ॥ ब्रह्माण्डाख्यस्य देहस्य बाह्ये तिष्ठति मुक्तिदम् ॥१९५॥ कैलासो नाम तस्यैव महेशो यत्रतिष्ठति॥अकुलाख्योऽविनाशीच क्षयवृद्धिविवर्जितः॥ १९६ ॥

टीका-तालुके ऊपरभागमें दिव्य सहस्रदल कमल है यह कमल मुक्तिदाता ब्रह्माण्डरूपी शरीरके बाहर स्थितहै अर्थात् शरीरके ऊपर अंतमें है इसी कमल को कैलास कहतेहैं इसी स्थानमें महेश्वरकी स्थितिहै यह ईश्वर निराकुल अविनाशी और क्षयवृद्धिरहित है ॥ १९५ ॥ १९६ ॥

मूलं-स्थानस्यास्य ज्ञानमात्रेण नृणां संसारेऽस्मिन् सम्भवो नैव भूयः ॥ भूतग्रामं सन्तताभ्यासयोगात् कर्तुं हर्तुं स्याच्च शक्तिः समग्रा ॥ १९७ ॥

टीका-इस स्थानके ज्ञानमात्रसे जीवका यह संसारमें फिर जन्म नहीं होता और सर्वदा यह ज्ञानयोग अभ्यास करनेसे जीवमात्रके स्थिति संहार करनेकी शक्ति उत्पन्न होती है ॥ १९७ ॥

मूलं-स्थाने परेहंसनिवासभूते कैलासनाम्नीह निविष्टचेताः॥योगी हतव्याधिरधःकृताधिर्वायुश्चिरं जीवति मृत्युमुक्तः॥१९८॥

टीका-यह कैलासनामक स्थानमें परमहंसका निवासहै सो सहस्रदल कमलमें जो साधक मनको स्थिर करताहै उसकी सकल व्याधि नाश होजाती है और मृत्युसे छूटके अमर हो जाताहै ॥ १९८ ॥

मूलं-चित्तवृत्तिर्यदालीना कुलाख्येपरमेश्वरे ॥ तदा समाधिसाम्येन योगी निश्चलतां व्रजेत् ॥ १९९ ॥

टीका-जब साधक यह कुलनामक ईश्वरमें चित्त को लीन करदेगा तब योगीकी समाधि निश्चल सम होजायगी ॥ १९९ ॥

मूलं-निरन्तरकृते ध्याने जगद्विस्मरणं भवेत् ॥ तदा विचित्रसामर्थ्यं योगिनो भवति ध्रुवम् ॥ २०० ॥

टीका-यह निरन्तर ध्यान करनेसे जगत् विस्मरण हो जायगा तब योगीको अवश्य विचित्र सामर्थ हो जायगी ॥ २०० ॥

मूलं-तस्माद्गलितपीयूषं पिबेद्योगी निरन्तरं ॥ मृत्योर्मृत्युं विधायाशु कुलंजित्वा सरोरुहे ॥ २०१ ॥ अत्र कुण्डलिनी शक्तिर्लयं याति कुलाभिधा ॥ तदा चतुर्विधा सृष्टिर्लीयते परमात्मनि ॥ २०२ ॥

टीका-सहस्रदल कमलसे जो अमृत स्रवताहै उसको योगी निरन्तर पान करताहै सो योगी अपनेमृत्युका मृत्यु विधान पूर्वक कुलसहित जय करके चिरं-

जीवी होजाताहै और यही सहस्रदलकमलमें कुलरूपा कुण्डलनी शक्तिका लय होजाताहै तब यह चतुर्विधि सृष्टिभी परमात्मामें लय होजातीहै ॥ २०१ ॥ २०२ ॥

मूलं-यज्ज्ञात्वा प्राप्य विषयं चित्तवृत्तिर्वि-
लीयते ॥ तस्मिन्परिश्रमं योगी करोति
निरपेक्षकः ॥ २०३ ॥

टीका-यह सहस्रदल कमलके ज्ञान होनेसे अर्थात् इस विषयको प्राप्त करनेसे चित्तवृत्तिका लयहोजाताहै इसहेतुसे इसके ज्ञानार्थ निरपेक्षरूपसे योगी परिश्रमकरे ॥ २०३ ॥

मूलं-चित्तवृत्तिर्यदालीना तस्मिन् योगी
भवेद्ध्रुवं ॥ तदा विज्ञायतेऽखण्डज्ञानरूपो
निरञ्जनः ॥ २०४ ॥

टीका-जब योगीकी चित्तवृत्ति इसमें निश्चय लय होजायगी तब अखण्ड ज्ञानरूपी निरञ्जनका प्रकाश होगा अर्थात् ज्ञानहोगा ॥ २०४ ॥

मूलं-ब्रह्मांडबाह्ये संचिंत्य स्वप्रतीकं य-
थोदितं ॥ तमावेश्य महत्शून्यं चिन्तये-
दविरोधतः ॥ २०५ ॥

टीका-ब्रह्माण्डके बाहर अर्थात् शरीरके बाहर पू-

वोंक्त स्वप्रतीकका चिन्तनकरे उससे चित्तको स्थिर करके महत् शून्यका शुद्धवृत्तिसे चिन्तनकरे ॥२०५॥

मूलं–आद्यन्तमध्यशून्यं तत्कोटिसूर्यसमप्रभं ॥ चन्द्रकोटिप्रतीकाशमभ्यस्य सिद्धिमाप्नुयात् ॥ २०६ ॥

टीका–आदि अंत मध्य शून्य यह सर्वत्र शून्यमें कोटि सूर्यके समान प्रभा और कोटि चन्द्रके समान शीतलप्रकाशके देखनेका अभ्यास करनेसे साधकको परमसिद्धि लाभ होगी ॥ २०६ ॥

मूलं–एतद्ध्यानं सदा कुर्यादनालस्यं दिने दिने ॥ तस्य स्यात्सकलासिद्धिर्वत्सरान्नात्रसंशयः ॥ २०७ ॥

टीका–जोपुरुष आलस्यको त्यागके सर्वदा प्रतिदिन इसशून्यका ध्यानकरेगा उसको निश्चय एकवर्षमें सकल सिद्धि लाभहोगी ॥ २०७ ॥

मूलं–क्षणार्धं निश्चलं तत्र मनो यस्य भवेद्ध्रुवं ॥ स एव योगी सद्भक्तः सर्वलोकेषु पूजितः ॥ तस्य कल्मषसङ्घातस्तत्क्षणादेव नश्यति ॥ २०८ ॥

टीका–जोसाधक इस शून्यमें अर्धक्षणभी मनको

निश्चल स्थिर रखेगा वही निश्चय यथार्थ भक्त योगीहै और वह सर्व लोकमें पूजित होताहै और उसके पाप-का समूह उसीक्षण नष्ट होजाताहै ॥ २०८ ॥

मूलं–यं दृष्ट्वा न प्रवर्त्तंते मृत्युसंसारव-र्त्मनि ॥ अभ्यसेत्तं प्रयत्नेन स्वाधिष्ठानेन वर्त्मना ॥ २०९ ॥

टीका–इसके अवलोकन करनेसे मृत्युरूप जो सं-सारपथहै इसमें भ्रमण करना छूट जायगा अर्थात् जन्ममरणसे रहित होजायगा इसका अभ्यास स्वाधि-ष्ठान मार्गसे यत्न करके करना उचितहै ॥ २०९ ॥

मूलं–एतद् ध्यानस्य माहात्म्यं मया वक्तुं न शक्यते ॥ यः साधयति जानाति सोस्माकमपि सम्मतम् ॥ २१० ॥

टीका–हे देवी इस शून्यके ध्यानके माहात्म्यको हम नहीं कहसकते अर्थात् बहुत विशेषहै जो योगी इसका अभ्यास करतेहैं सो जानते हैं और वह हमारे बराबरहैं ॥ २१० ॥

मूलं–ध्यानादेव विजानाति विचित्रफल-सम्भवम् ॥ अणिमादिगुणोपेतो भवत्ये व न संशयः ॥ २११ ॥

टीका-यह शून्यका ध्यानका विचित्र फल ध्यानसे ही जाना जाताहै इसके प्रभावसे साधकको अणिमादि अष्टसिद्धि अवश्य प्राप्त होतीहै ॥ २११ ॥

मूलं-राजयोगो मया ख्यातः सर्वतन्त्रेषु गोपितः ॥ राजाधिराजयोगोऽयं कथयामि समासतः ॥ २१२ ॥

टीका-हेपार्वती यह राजयोग सर्व तन्त्रोंकरके गोपितहै सो तुमसे हमनें कहाहै अब राजाधिराज योग विस्तार सहित कहते हैं श्रवण करो ॥ २१२ ॥

मूलं-स्वस्तिकञ्चासनं कृत्वा सुमठे जन्तुवर्जिते ॥ गुरुं संपूज्य यत्नेन ध्यानमेतत्समाचरेत् ॥ २१३ ॥

टीका-साधक एकांतस्थान जनरहित सुन्दर मठसे यत्नपूर्वक गुरुकी पूजा करके स्वस्तिकासनसे स्थित होके यह ध्यान करे ॥ २१३ ॥

मूलं-निरालम्बं भवेज्जीवं ज्ञात्वा वेदान्तयुक्तितः॥निरालम्बं मनः कृत्वा न किञ्चिच्चिन्तयेत् सुधीः ॥ २१४ ॥

टीका-बुद्धिमान योगी वेदांत युक्ति अनुसार जीवको और मनको निरालम्ब करके चिन्तन करे इसके सिवाय और कुछ चिन्तना न करे ॥ २१४ ॥

मूलं—एतद्ध्यानान्महासिद्धिर्भवत्येव न संशयः॥ वृत्तिहीनं मनः कृत्वा पूर्णरूपं स्वयं भवेत्॥ २१५॥

टीका—इसप्रकार ध्यान करनेसे महासिद्धि उत्पन्न होगी इसमें संशय नहीं है ऐसेही मनको वृत्तिहीन करके साधक आपही पूर्ण आत्मस्वरूप होजायगा२१५॥

मूलं—साधयेत्सततं योवै सयोगी विगतस्पृहः॥ अहंनाम न कोप्यस्ति सर्वदात्मैव विद्यते॥ २१६॥

टीका—जो योगी निरन्तर इसप्रकार साधनकरे सो इच्छारहितहै अर्थात् उसको किसीवस्तुकी इच्छा नहोगी और उसके वदनसे अहंशब्द कभी उच्चारण नहोगी वह सर्वदा सर्ववस्तुको आत्मस्वरूपही देखेगा॥ २१६॥

मूलं—कोबन्धः कस्य वा मोक्ष एकं पश्येत्सदाहि सः॥ २१७॥ एतत् करोति योनित्यं समुक्तो नात्रसंशयः॥ स एव योगी सद्भक्तः सर्वलोकेषु पूजितः॥२१८॥

टीका—कौन बन्धहै और क्या मोक्षहै सर्वदा एक परिपूर्ण आत्माको देखे जो योगी यह नित्य चिन्तनक-

रताहै सो मुक्तहै इसमें संशय नहींहै और निश्चय वही योगी सद्भक्तहै और सर्वलोकमें पूजनीयहै॥२१७॥२१८

मूलं–अहमस्मीतियन्मत्वा जीवात्मपरमात्मनोः॥ अहंत्वमेतदुभयं त्यक्त्वा खण्डं विचिन्तयेत् ॥२१९॥ अध्यारोपापवादाभ्यां यत्र सर्वं विलीयते ॥ तद्बीजमाश्रयेद्योगी सर्वसंगविवर्जितः ॥ २२० ॥

टीका–योगी अपनेको और जीवात्मा और परमात्माको तुल्य माने अर्थात् भेदरहित होजाय और हम और तुम यह दोनों भावको त्यागके एक अखण्ड ब्रह्मका चिन्तनकरे अध्यारोप अपवादद्वारा जिसमें सर्व वस्तुका लय होजाताहै योगी सर्व सङ्गसे रहित होके उसी बीजके आश्रय होजाया अर्थात् चित्तवृत्ति को आत्मामें लयकरदे ॥ २१९॥ ॥ २२०॥

मूलं–अपरोक्षं चिदानन्दं पूर्णं त्यक्त्वा भ्रमाकुलाः ॥ परोक्षं चापरोक्षं च कृत्वा मूढा भ्रमन्ति वै ॥ २२१ ॥

टीका–मूढबुद्धिके मनुष्य अपरोक्ष अर्थात् प्रत्यक्षपरिपूर्णब्रह्मको छोड करके भ्रममें, पडके परोक्ष और अपरोक्षका रात्रि दिवस निर्णय करते फिरते हैं ॥ २२१ ॥

मूलं–चराचरमिदं विश्वं परोक्षं यः करोति च ॥ अपरोक्षं परं ब्रह्म त्यक्तं तस्मिन् प्रलीयते ॥ २२२ ॥

टीका–जो मनुष्य यह चराचर संसारको शास्त्रसे विवाद करके परोक्ष करते हैं और अपरोक्ष परब्रह्मको त्यागदेते हैं अर्थात् ब्रह्मभी प्राप्त नहीं होता वह अज्ञानी संसारमें लय होते हैं अर्थात् उनका मोक्ष नहीं होता ॥ २२२ ॥

मूलं–ज्ञानकारणमज्ञानं यथानोत्पद्यते भृशम्॥ अभ्यासं कुरुते योगी सदा सङ्गविवर्जितम् ॥ २२३ ॥

टीका–जिससे ज्ञान उत्पन्न होताहै और अज्ञानका नाश होताहै इसी योग अभ्यासको योगी सर्वदा सङ्गरहित होके अभ्यास करे ॥ २२३ ॥

मूलं–सर्वेन्द्रियाणि संयम्य विषयेभ्यो विचक्षणः ॥ विषयेभ्यः सुषुप्त्यैव तिष्ठेत्संग विवर्जितः ॥ २२४ ॥

टीका–बुद्धिमानयोगी विषयोंसे इंद्रियोंको रोकके सङ्ग रहित होके विषयके त्यागमें सुषुप्तिके समान स्थिर रहते हैं ॥ २२४ ॥

मूलं-एवमभ्यासतो नित्यं स्वप्रकाशं प्रकाशते ॥ श्रोतुं बुद्धिसमर्थार्थं निवर्तन्ते गुरोर्गिरः ॥ तदभ्यासवशादेकं स्वतो ज्ञानं प्रवर्तते ॥ २२५ ॥

टीका-इसी प्रकार नित्य अभ्यास करनेसे साधक को आपही ज्ञानका प्रकाश होगा तब गुरुके वचनकी निवृत्ति होगी अर्थात् गुरुके उपदेशका अंत हो जायगा जब इतर वाक्य श्रवण करनेकी इच्छा निवृत्त हो जायगी तब यह योगअभ्यासद्वारा आपही एक अद्वैत ज्ञानमें प्रवृत्ति होगी ॥ २२५ ॥

मूलं-यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ॥ साधनादमलं ज्ञानं स्वयं स्फुरति तद्ध्रुवम् ॥ २२६ ॥

टीका-यह ब्रह्म किसी प्रकार प्राप्त नहीं होता मन वाक्यकाभी गम नहीं है परन्तु यह योगसाधनसे आपही निर्मल ज्ञान प्रकाश होताहै ॥ २२६ ॥

मूलं-हठंविना राजयोगो राजयोगं विना हठः ॥ तस्मात् प्रवर्तते योगी हठे सद्गुरु मार्गतः ॥ २२७ ॥

टीका-हठयोगके विना राजयोग और राजयोगके विना हठयोग सिद्ध नहीं होता इस हेतुसे योगीको उचितहै कि योगवेत्ता सद्गुरुद्वारा हठयोगमें प्रवृत्त होय ॥ २२७ ॥

मूलं-स्थिते देहे जीवति च योगं न श्रियते भृशम्॥ इन्द्रियार्थोपभोगेषु स जीवति न संशयः॥ २२८॥

टीका-जो मनुष्य इस शरीरसे योगका आसरा नहीं ग्रहण करते वह केवल इंद्रियोंके भोग भोगनेके अर्थ संसारमें जीते हैं इसमें संशय नहीं है ॥ २२८ ॥

मूलं-अभ्यासपाकपर्यन्तं मितान्नं स्मरणं भवेत्॥ अन्यथा साधनं धीमान्कर्तुं पारयतीह न॥ २२९॥

टीका-बुद्धिमान् साधक योग अभ्यासके आरम्भसे अभ्यास सिद्धपर्यंत मिताहारी रहे अर्थात् प्रमाणका भोजन करे अन्यथा अर्थात् अप्रमाण भोजन करनेसे योग अभ्यासके पार न होगा अर्थात् सिद्ध न होगा२२९

मूलं-अतीवसाधुसंलापं साधुसम्मतिबुद्धिमान्॥करोति पिण्डरक्षार्थं बह्वालापवि

वर्जितः ॥२३०॥ त्याज्यते त्यज्यते सङ्गं सर्वथा त्यज्यते भृशम्॥अन्यथा न लभे न्मुक्तिं सत्यं सत्यं मयोदितम् ॥ २३१ ॥

टीका–बुद्धिमान साधक सभामें साधूके समान थोडा और प्रमाण वाक्य बोले और शरीरके रक्षार्थ थोडा भोजन करे और संगको सर्व प्रकारसे तजदे कदापि किसीके संगमें लिप्त न होय हे पार्वती और दूसरे प्रकार कदापि मुक्ति नहीं पावेगा यह हम सर्वथा सत्य कहते हैं इसमें संशय नहीं हैं ॥ २३० ॥ २३१ ॥

मूलं–गुप्त्यैव क्रियतेऽभ्यासः संगं त्यक्त्वा तदन्तरे॥ व्यवहाराय कर्तव्यो बाह्यसंगो न रागतः॥२३२॥ स्वेस्वे कर्मणि वर्तन्ते सर्वे ते कर्मसम्भवाः॥ निमित्तमात्रं करणे न दोषोस्ति कदाचन ॥ २३३ ॥

टीका–साधक संग रहित होके एकान्त स्थानमें योग साधन करे यदि संसारी मनुष्योंसे व्यवहार वर्तनेकी इच्छा करे तो अन्तर प्रीति रहित होके बाह्यसंग करे और अपना आश्रम धर्म कर्मभी इसी प्रकार करता रहै इस हेतुसे कि ज्ञानादि यावत्कर्म हैं सब कर्मानुसार होते हैं फल इच्छा रहित होके केवल निमित्त

मात्र कर्म करनेसे कदापि दोष नहीं है॥२३२॥२३३॥

मूलं–एवं निश्चित्य सुधिया गृहस्थोपि यदाचरेत् ॥ तदासिद्धिमवाप्नोति त्रना कार्या विचारणा ॥ २३४ ॥

टीका–इसी प्रकार निश्चय बुद्धिसे यदि गृहस्थभी योग अभ्यास करे तो वह अवश्य सिद्धिलाभ करेगा इसमें संशय नहीं है ॥ २३४ ॥

मूलं–पापपुण्यविनिर्मुक्तः परित्यक्ताङ्गसाधकः ॥यो भवेत्स विमुक्तः स्यात् गृहे तिष्ठन्सदागृही ॥ २३५ ॥ न पापपुण्यैर्लिप्येत योगयुक्तो यदा गृही ॥ कुर्वन्नपि तदा पापान्स्वकार्ये लोकसंग्रहे ॥ २३६ ॥

टीका–जो साधक पाप पुण्यसे निर्लिप्त इन्द्रिय संगत्यागीहै सोई गृही साधक गृहमें रहके मुक्तहै योग युक्त गृही पाप पुण्यमें बद्ध नहीहोता यदि संसारके संग्रहमें पापभी करेगा तो वह पाप उसको स्पर्श नकरेगा ॥ २३५ ॥ २३६ ॥

मूलं–अधुना संप्रवक्ष्यामि मन्त्रसाधनमुत्तमम् ॥ ऐहिकामुष्मिकसुखं येन स्यादविरोधतः ॥ २३७ ॥

टीका—हेदेवी अब उत्तममन्त्र साधन हम कहतेहैं जिससे इस लोक और परलोक दोनों स्थानमें साधक आनन्दपूर्वक सुख भोगेगा ॥ २३७ ॥

मूलं—यस्मिन्मन्त्रे वरे ज्ञाते योगसिद्धिर्भवेत् खलु॥योगेन साधकेन्द्रस्य सर्वैश्वर्यसुखप्रदा ॥ २३८ ॥

टीका—यह उत्तम मन्त्रके ज्ञान होनेसे निश्चय योग सिद्ध होताहै साधकेन्द्रको यह योग सर्व ऐश्वर्य सुखका दाताहै ॥ २३८ ॥

मूलं—मूलाधारेस्ति यत्पद्मं चतुर्दलसमन्वितम् ॥ तन्मध्ये वाग्भवं बीजं विस्फुरन्तं तडित्प्रभम् ॥२३९॥हृदये कामबीजन्तु बन्धूककुसुमप्रभम् ॥ आज्ञारविन्दे शक्त्याख्यं चन्द्रकोटिसमप्रभम्॥२४०॥ बीजत्रयमिदं गोप्यं भुक्तिमुक्तिफलप्रदम् ॥ एतन्मन्त्रत्रयं योगी साधयेत्सिद्धिसाधकः॥ २४१ ॥

टीका—जो मूलाधार चतुर्दल संयुक्त पद्महैं उसमें विद्युतके समान प्रभायुक्त वाग्बीजकी स्थितिहै और हृदयकमलमें बन्धूकपुष्पके समान प्रभायुक्त कामबी-

जकी स्थितीहै और आज्ञाकमलमें कोटिचन्द्रके समान प्रभायुक्त शक्तिबीजकी स्थितिहै यह बीजत्रय परम गोपनीय भोग और मुक्तिके दाताहैं यह तीनों मन्त्रका साधन योगी अवश्यकरे ॥ २३९ ॥ २४० ॥ २४१ ॥

मूलं–एतन्मन्त्रं गुरोर्लब्ध्वा न द्रुतं न विलम्बितम् ॥ अक्षराक्षरसन्धानं निःसन्दिग्धमना जपेत् ॥ २४२ ॥

टीका–साधक गुरुसे यह मन्त्रका उपदेश लेके धीरेधीरे अक्षर अक्षर स्पष्ट उच्चारणपूर्वक स्थिर मनहोके जपकरे ॥ २४२ ॥

मूलं- तद्गतश्चैकचित्तश्च शास्त्रोक्तविधिना सुधीः ॥ देव्यास्तु पुरतोलक्षं हुत्वा लक्ष त्रयं जपेत् ॥ २४३ ॥

टीका–बुद्धिमान साधक एकाग्र चित्तसे शास्त्रविधिअनुसार देवीके समीपमें एकलक्ष होम करके तीनलक्ष जपकरे ॥ २४३ ॥

मूलं–करवीरप्रसूनन्तु गुडक्षीराज्यसंयुतम् ॥कुण्डे योन्याकृते धीमान् जपान्ते जुहुयात्सुधीः ॥ २४४ ॥

टीका–बुद्धिमान साधक जपके पीछे योन्याकार

कुण्ड बनायके कनेरपुष्पके साथ गुड और दुध और घृतमिलायके होमकरे ॥ २४४ ॥

मूलं–अनुष्ठाने कृते धीमान् पूर्वसेवाकृता भवेत् ॥ ततो ददाति कामान्वै देवी त्रिपुरभैरवी ॥ २४५ ॥

टीका–बुद्धिमान् साधक इसीप्रकार अनुष्ठानपूर्वक आराधना करके त्रिपुरभैरवी देवीको सन्तुष्टकरे तो उसको इच्छापूर्वक देवी फलदेतीहैं ॥ २४५ ॥

मूलं–गुरुं सन्तोष्य विधिवत् लब्ध्वामन्त्रवरोत्तमम् ॥ अनेन विधिना युक्तोमन्दभाग्योऽपिसिध्यति ॥ २४६ ॥

टीका–साधक विधिपूर्वक गुरुको संतोष करके यह उत्तममन्त्र ग्रहणकरे इसविधान संयुक्त ग्रहण करनेसे मन्दभाग्य साधकभी सिद्धिलाभ करतेहैं ॥२४६॥

मूलं–लक्षमेकं जपेद्यस्तु साधको विजितेन्द्रियः ॥ २४७ ॥ दर्शनात्तस्य क्षुभ्यन्ते योषितो मदनातुराः ॥ पतन्ति साधकस्याग्रे निर्लज्जा भयवर्जिताः ॥ २४८ ॥

टीका–योगी इन्द्रिय निग्रह पूर्वक एकलक्ष जपकरे तो उसके दर्शनमात्रसे कामातुर स्त्रीयें मोहित

होयके साधकके आगे निर्लज्ज और भयरहित होके गिरतो हैं ॥ २४७ ॥ २४८ ॥

मूलं-जप्तेनच द्विलक्षेण ये यस्मिन्विषये- स्थिताः ॥ आगच्छन्ति यथातीर्थं विमुक्त कुलविग्रहाः॥ ददाति तस्य सर्वस्वं तस्यै- वच वशेस्थिताः ॥ २४९ ॥

टीका-यह मन्त्र दोलक्ष जप करनेसे कामिनी स्त्रीयें साधकके समीप इसप्रकार आतीहैं की जैसै कुलीना तीर्थोंमें भय लज्जा रहित होके जातीहैं और साधकके वशमें होके अपना सर्वस्व उसको देतीहैं ॥ २४९ ॥

मूलं-त्रिभिर्लक्षैस्तथाजप्तैर्मण्डलीकं समण्डलम्॥२५०॥वशमायान्ति ते सर्वे नात्र कार्या विचारणा ॥ षड्भिर्लक्षैर्महीपालं सभृत्यबलवाहनम् ॥२५१॥

टीका-तीनलक्ष जप करनेसे मंडलसहित मंडलपती साधकके वशमें होजायगे इसमें संशय नहीं हैं और छःलक्ष जप करनेसे साधक बलवाहन संयुक्त राजा होजायगा ॥ २५० ॥ २५१॥

मूलं-लक्षैर्द्वादशभिर्जप्तैर्यक्षरक्षोरगेश्वराः॥

वशमायान्ति ते सर्वे आज्ञां कुर्वन्ति नित्यशः ॥ २५२ ॥

टीका–यह मन्त्र बारहलक्ष जप करनेसे यक्ष और राक्षस और पन्नग यह सब वशमें होके साधककी नित्य आज्ञा पालन करतेहैं ॥ २५२ ॥

मूलं–त्रिपञ्चलक्षजप्तैस्तु साधकेन्द्रस्य धीमतः ॥ सिद्धविद्याधराश्चैव गन्धर्वाप्सरसाङ्गणाः ॥ २५३॥ वशमायान्ति ते सर्वे नात्र कार्या विचारणा॥ हठात् श्रवणविज्ञानं सर्वज्ञत्वं प्रजायते ॥ २५४ ॥

टीका–पन्द्रहलक्ष जप करनेसे सिद्ध और विद्याधर और गंधर्व और अपसरा यह सब बुद्धिमान साधकके वशमेंहो जातेहैं इसमें संदेह नहींहै और साधकको हठसे विशेष श्रवणशक्ति होगी और सर्ववस्तुका ज्ञान उत्पन्न होगा ॥ २५३ ॥ २५४ ॥

मूलं–तथाष्टादशभिर्लक्षैर्देहेनानेन साधकः॥ उत्तिष्ठेन्मेदिनीं त्यक्त्वा दिव्यदेहस्तु जायते॥ भ्रमते स्वेच्छया लोके छिद्रां पश्यति मेदिनीम् ॥ २५५ ॥

टीका–जो साधक अठारहलक्ष जप करेगा वह भू-

मिको त्यागके दिव्यदेह होके आकाशमार्गसे संसारमें इच्छापूर्वक भ्रमण करेगा और पृथ्वीके छिद्रोंको देखेगा अर्थात् पृथ्वीमें प्रवेश करनेके मार्ग देखेगा ॥२५५॥

मूलं-अष्टाविंशतिभिर्लक्षैर्विद्याधरपतिर्भवेत् ॥ साधकस्तुभवेद्धीमान्कामरूपो महाबलः ॥ २५६ ॥ त्रिंशल्लक्षैस्तथाजप्तैर्ब्रह्मविष्णु समोभवेत् ॥ रुद्रत्वं षष्टिभिर्लक्षैरमरत्वमशीतिभिः ॥२५७॥ कोटचैकया महायोगी लीयते परमेपदे ॥ साधकस्तु भवेद्योगी त्रैलोक्ये सोऽतिदुर्लभः॥२५८॥

टीका-जो बुद्धिमान साधक अट्ठाइसलक्ष जप करेगा वह महाबल कामरूपी और विद्याधरपती होजायगा और तीसलक्ष जप करनेसे साधक ब्रह्मा विष्णुके समानहोजायगा और साठलक्ष जप करनेसे रुद्रके समान होजायगा और अस्सीलज जप करनेसें साधक सर्व भूतोंको प्रिय होजायगा और एककोटि जप करनेसे साधक महायोगी होयके परमपदमें लीन होजाताहै पार्वती इसप्रकार योगी त्रिभुवनमें दुर्लभहै२५६।२५७।२५८।

मूलं-त्रिपुरे त्रिपुरन्त्वेकं शिवं परमकारणम् ॥ २५९ ॥ अक्षयं तत्पदं शान्तमप्र-

मेयमनामयम् ॥ लभतेऽसौनसन्देहोधी-
मान् सर्वमभीप्सितम् ॥ २६० ॥

टीका-हेपार्वती एक त्रिपुर शिवही परमकारण स्वरूपहै उनका चरणकमल अक्षय शान्त अप्रमेय अर्थात् प्रमाणरहित अनामय अर्थात् रोगरहितहै सो चरणकमल बुद्धिमान योगी लोगही इच्छापूर्वकलाभ करतेहैं इसमें संदेह नहीं है ॥ २५९ ॥ २६० ॥

मूलं-शिवाविद्या महाविद्या गुप्ताचाग्रेमहेश्वरी॥मद्भाषितमिदं शास्त्रं गोपनीयमतो
बुधैः ॥ २६१ ॥

टीका-हेमहादेवी यह हमारी कही हुई महाविद्या कोही शिवविद्या कहतेहैं यह विद्या सर्वप्रकार गोपनीयहै इस योगशास्त्रको बुद्धिमान लोग कदापि प्रकाश नहीं करतेहैं ॥ २६१ ॥

मूलं-हठविद्यापरंगोप्या योगिना सिद्धिमिच्छता ॥ भवेद्वीर्यवती गुप्ता निर्वीर्या-
च प्रकाशिता ॥ २६२ ॥

टीका-सिद्धिकांक्षी योगीलोग इस हठविद्याको अतिगोपित्त रक्खें यह गोप्य रखनेसे वीर्यवती रहतीहै और प्रकाश करनेसे निर्वीर्या होजातीहै ॥ २६२ ॥

मूलं—य इदं पठते नित्यमाद्योपान्तं विचक्षणः॥ योगसिद्धिर्भवेत्तस्य क्रमेणैव न संशयः॥ स मोक्षं लभते धीमान् य इदं नित्यमर्चयेत्॥ २६३॥

टीका—जो विद्वान यह शिवसंहिताका नित्य आद्योपान्तपाठ करेगा उसको क्रमसे अवश्य योगसिद्धि होगी और जो बुद्धिमान इस ग्रन्थका नित्य पूजन करेगा उसको मुक्ति लाभ होगी॥ २६३॥

मूलं—मोक्षार्थिभ्यश्च सर्वेभ्यः साधुभ्यः श्रावयेदपि॥२६४॥क्रियायुक्तस्य सिद्धिः स्यादक्रियस्य कथम्भवेत्॥तस्मात् क्रिया विधानेन कर्तव्या योगिपुंगवैः॥२६५॥ यदृच्छालाभसन्तुष्टः सन्त्यक्तान्तरसंगकः॥ गृहस्थश्चाप्यनासक्तः स मुक्तो योगसाधनात्॥ २६६॥

टीका—मोक्षार्थी और साधु सर्व और मनुष्य जो क्रियासे युक्त होगा उसको सिद्धिप्राप्त होगी क्रियाहीन मनुष्यको क्या होसक्ताहै अर्थात् सिद्धि लाभ नहीं होसकती विधानपूर्वक क्रियाका अनुष्ठानकरे तो इच्छापूर्वक लाभसे सन्तुष्ट होगा और जो गृहस्थहोगा और

इन्द्रियोंमें आसक्त नहोगा सो मनुष्य योगसाधनसे मुक्तहोगा ॥ २६४ ॥ २६५ ॥ २६६ ॥

मूलं-गृहस्थानां भवेत् सिद्धिरीश्वराणां जपेन वै ॥ योगक्रियाभियुक्तानां तस्मात्संयतते गृही ॥ २६७ ॥

टीका-योगक्रियावान् गृहस्थ लोगोंको जप करनेसे सिद्धि प्राप्तहोगी इसहेतुसे योगसाधनमें गृहस्थ मनुष्यको यत्न करना उचितहै ॥ २६७ ॥

मूलं-गेहे स्थित्वा पुत्रदारादिपूर्णः सङ्गं त्यक्त्वा चान्तरे योगमार्गे ॥ सिद्धेश्चिह्नं वीक्ष्य पश्चाद्गृहस्थः क्रीडेत्सो वै सम्मतं साधयित्वा ॥ २६८ ॥

टीका-जो गृहस्थ गृहमें रहके स्त्री पुत्रादिसे पूर्णहोके अंतरीय सबसे त्यागपूर्वक योगसाधनसें प्रवृत्त होय सो सिद्धिचिह्न अवलोकन पूर्वक साधनाकरके सर्वदा आनन्दमें क्रीडा करेगा ॥ २६८ ॥

इतिश्रीशिवसंहितायां हरगौरीसंवादे योगशास्त्रे पंचमः पटलः समाप्तः ॥ ५ ॥ शुभम् ॥

श्रीः।

उमामहेश्वरमाहात्म्यम्।

उमा भगवतीयेयं ब्रह्मविद्येति कीर्तिता॥ रूपयौवनसम्पन्ना वधूर्भूत्वात्र सा स्थिता॥१॥ नानाजातिवधूनां हि बिंबभूतामहेश्वरी॥२॥ यस्याः प्रसादतः सर्वः स्वर्गं मोक्षं च गच्छति॥ इह लोकेसुखं तद्वज्जंतुर्देवादिकोपि वा॥ ३॥ ब्रह्माविष्णुस्तथारुद्रः शक्राद्याःसर्वदेवताः॥ कटाक्षपाततो यस्या भवंति न भवंति च॥४॥पीनोन्नतस्तनीप्रौढजघनाच कृशोदरी॥ चंद्रानना मीननेत्रा केशभ्रमरमंडिता॥५॥ सर्वांगसुंदरी देवीधैर्यपुंजविनाशिनी॥ कांचीगुणेन चित्रेण वलयांगदनूपुरैः॥६॥ हारैर्मुक्तादिसंजातैः कंठाद्याभरणैरपि॥ मुकुटेनापि चित्रेण कुंडलाद्यैः सहस्रशः॥७॥ विराजिताह्यनौपम्यरूपाभूषणभूषणा॥ जननी सर्वजगतो ह्यष्टवर्षाचिरंतनी॥८॥ तयासमेतं पुरुषं तत्प-

तिं तद्गुणाधिकं॥ ब्रह्मादीनां प्रभुं नाना सर्वभूषणभूषितम् ॥ ९॥ द्वीपिचर्मावृतं शश्वदथवापिदिगंबरं ॥ भस्मोद्धूलितस-र्वांगं ब्रह्ममूर्धौघमालिनम्॥१०॥तथैव चं-द्रखंडेन विराजितजटातटं॥गंगाधरं स्मे-रमुखं गोक्षीरधवलोज्ज्वलम् ॥ ११ ॥ कं-दर्पकोटिसदृशं सूर्यकोटिसमप्रभम् ॥ सृष्टिस्थित्यंतकरणं सृष्टिस्थित्यंतवर्जि-तम् ॥ १२ ॥ पूर्णेन्दुवदनांभोजं सूर्यसो-माग्निवर्चसम् ॥ सर्वांगसुंदरं कंबुग्रीवंचा-तिमनोहरम् ॥ १३ ॥ आजानुबाहुं पुरुषं नागयज्ञोपवीतिनम् ॥ पद्मासनसमासी-नं नासाग्रन्यस्तलोचनम् ॥ १४ ॥ वाम-देवं महादेवं गुरूणां प्रथमं गुरुम् ॥ स्वयं-ज्योतिःस्वरूपं तमानंदात्मानमद्वयम् ॥ १५ ॥ यतो हिरण्यगर्भोयं विराजो-जनकः पुमान् ॥ जातः समस्तदेवानाम-न्येषां च नियामकः ॥ १७ ॥ नीलकंठम-मुं देवं विश्वेशं पापनाशनम् ॥ हृदिपद्मे

थवासूर्ये वह्नौवा चंद्रमंडले ॥ १७॥ कैला-
सादिगिरौ वापि चिंतयेद्योगमाश्रितः ॥
एवं चिंतयतस्तस्य योगिनो मानसंस्थि-
रम् ॥१८॥ यदा जातं तदा सर्वप्रपंचरहि-
तं शिवं ॥ प्रपंचकरणं देवमवाङ्मनसगो-
चरम ॥ १९ ॥ प्रयातिस्वात्मना योगी पु-
रुषं दिव्यमद्भुतं ॥ तमसः स्वात्ममोहस्य
परंतेनविवर्जितम ॥२०॥ साक्षिणं सर्वबु-
द्धीनां बुद्ध्यादिपरिवर्जितम् ॥ उमासहा-
यो भगवान्सगुणः परिकीर्तितः॥२१॥नि-
र्गुणश्च सएवायं नयतोन्योस्तिकश्चन ॥
ब्रह्माविष्णुस्तथारुद्रः शक्रोदेवसमन्वि-
तः ॥ २२ ॥ अग्निः सूर्यस्तथा चंद्रः कालः
सृष्ट्यादिकारणम् ॥एकादशेंद्रियाण्यंतः
करणंच चतुर्विधम् ॥ २३ ॥प्राणाः पंचम-
हाभूतपंचकेन समन्विताः ॥ दिशश्च प्र-
दिशस्तद्वदुपरिष्टादधोपिच ॥ २४ ॥ स्वे-
दजादीनि भूतानि ब्रह्मांडंच विराड्वपुः ॥

विराड्हिरण्यगर्भश्च जीवईश्वर एव
च ॥ २५॥ मायातत्कार्यमखिलं वर्तते स
दसच्चयत् ॥ यच्चभूतं यच्चभव्यं तत्सर्वं
महेश्वरः ॥ २६ ॥

इति श्रीउमामहेश्वरमाहात्म्यं संपूर्णम् ।

पुस्तक मिलनेका ठिकाना.
खेमराज श्रीकृष्णदास
श्रीवेंकटेश्वर छापखाना (मुंबई.